

# तर्कशास्त्रपरिचयः

## Course Code: B21SN06DE

Discipline Specific Elective Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# तर्कशास्त्रपरिचयः

Course Code: B21SN06DE

Semester - V

## Discipline Specific Elective Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# तर्कशास्त्रपरिचयः

Course Code: B21EG06DE
Semester- V
Discipline Specific Elective Course
BA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY

**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Dr. G. Sahadevan
Unnikrishnan Nair S.

**Review and Edit**

Dr. N. Viswarajan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Chitra Bhaskar
Dr. Jothilekshmi M.
Dr. Sreeja J.
Dr. Vijayarajan K.U.
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition:**
January 2025

**Copyright:**
© Sreenarayanaguru Open University

ISBN 978-81-982562-8-7

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-01-2025

## Contents


| | |
|---|---|
| **Block-1भारतीयदर्शनानां सामान्यपरिचयः** | 3 |
| Unit-1 दर्शनभेदाः | 4 |
| Unit-2 न्यायवैशेषिकयोरुत्पत्तिविकासौ | 16 |
| Unit-3 मूलततनि प्रमुखग्रन्थाश्च | 24 |
| Unit-4 प्रकरणग्रन्थानां परिचयः | 30 |
| **Block 2- उद्देशप्रकरणम्** | 34 |
| Unit -1 मङ्गलवादः | 35 |
| Unit -2 शास्त्रप्रवृत्तिः | 41 |
| Unit-3 पदार्थविज्ञानम्- सप्तपदार्थाः | 45 |
| Unit -4 शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वखण्डनम् | 54 |
| **Block-3 द्रव्याणि गुणाश्च** | 58 |
| Unit -1 नवद्रव्याणां लक्षणं विभागश्च | 59 |
| Unit -2 अतिरिक्तद्रव्याणां निराकरणम् | 73 |
| Unit -3 पाकजगुणाः | 77 |
| Unit- 4 संख्यातः शब्दपर्यन्ताः गुणाः | 84 |
| **Block-4 प्रत्यक्षप्रमाणम्** | 93 |
| Unit- 1 बुद्धिभेदौ | 94 |
| Unit-2 कार्यकारणविचारः | 100 |
| Unit- 3 कारणत्रैविध्यम् | 105 |
| Unit- 4 प्रत्यक्षलक्षणं विभागश्च | 109 |
| **Block- 5 अनुमानप्रमाणम्** | 116 |
| Unit-1 अनुमानभेदाः | 117 |
| Unit-2 पञ्चावयवाः | 124 |
| Unit-3 लिङ्गम् - तद्भेदाश्च | 129 |
| Unit -4 हेत्वाभासाः | 136 |
| **Block-6 शब्दोपमानौ** | 146 |
| Unit -1 उपमानम् | 147 |
| Unit-2 शब्दप्रमाणम् | 151 |
| Unit- 3 अयथार्थानुभवस्य तथा शिष्टगुणानां च परिचयः | 160 |
| Unit-4 कर्म-सामान्य-विशेष-समवाय-अभावाः | 166 |
| Set-1 Model question paper | 175 |
| Set-2 Model question paper | 178 |


SGOU

SGOU

BLOCK -1

# भारतीयदर्शनानां सामान्यपरिचयः

SGOU

# Unit-1
# दर्शनभेदाः

## उद्देश्यानि (Learning Outcomes)

अस्य पाठभागस्य अध्ययनेन भवान्

1. दर्शनस्य प्राधान्यं ज्ञास्यति।
2. दर्शनविषयान् ग्रहिष्यति।
3. आस्तिकनास्तिकदर्शनानां परिचयं प्राप्स्यति।
4. न्यायवैशेषिकयोः साम्यतां वैधर्म्यं च वेत्स्यति।
5. तर्कशास्त्रग्रन्थैः साकं परिचयं प्राप्तुं शक्ष्यति।
6. तर्कसंग्रहकर्तुः अन्नंभट्टस्य परिचयं ज्ञातुं समर्थो भविष्यति।

## प्राग्व्यपेक्षाः(Pre requisites)

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते । भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अत एव अनेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति ।

## मुख्यपदानि (Key words)

सांख्यं, योगं, न्यायं, वैशेषिकं, पूर्वमीमांसा, उत्तरमीमांसा, चार्वाकं, बौद्धं, जैनं, आस्तिकदर्शनं, नास्तिकदर्शनं, जीवात्मा, परमात्मा, कैवल्यं, भेदाभेदं, द्वैतं, विशिष्टाद्वैतं, द्वैताद्वैतं, शुद्धाद्वैतं।

## Discussion

### 1.1 दर्शनम्

भारतं दर्शनानां धरा भवति। अनेकानि दर्शनानि भारते सञ्जातानि। इदानीं दर्शनमिति स्थाने तत्वचिन्ता तत्वशास्त्रं इति पदद्वयमपि उपयुज्यते। प्रेक्षणार्थकाद् दृश् धातेः 'दृशिर् प्रेक्षणे' इति धातोः ल्युट्प्रत्यये कृते निष्पन्नोऽयं दर्शनशब्दः। दृश्यते यथार्थतत्वं अनेन इति दर्शनम्। दर्शनं इत्यस्य भाषापरः अर्थः, नयनं, स्वप्नः, बुद्धिः, धर्मः, उपलब्धिः, दर्पणः शास्त्रम् इत्यादि। किन्तु 'अध्यात्मायत्तम्' इत्यर्थे अस्य पदस्य शास्त्रप्रयोगः दृश्यते। प्रपञ्चसृष्टिः, आस्तिक-नास्तिकचिन्ताः वेदानां प्रामाण्यादिकं च दर्शनस्य विषयः।

लोके तावत् एकं वस्तु समानरूपेण सर्वे न पश्यन्ति। पुष्पं कदाचित् कवेः मनसि अनेकान् विकारविचारान् जनयति। किन्तु शास्त्रज्ञस्य मनसि तथाभूताः विकाराः न प्रादुर्भवन्ति। पुष्पस्य दलादिषु परागरेणूनां च कार्ये शास्त्रज्ञस्य चिन्ताः जागरिताः भवेयुः। प्रतिव्यक्ति मतिः भिन्ना। तद्वत् दर्शनकार्येऽपि समानता वर्तितव्यम् इति वक्तुं न शक्यते।

सर्वाणि शास्त्राणि दर्शनानुसारं सञ्जातानि । शास्त्रस्य प्रदीपदायकं मार्गदर्शकं भवति दर्शनम्। शास्त्राभिवृद्धेः कारणेषु अन्यतमं भवति शास्त्ररूपीकरणाय प्रयुक्तमानं दर्शनम्। किं नाम दर्शनम् ? दृश्यते इति दर्शनम्। दृश्यते अनेन इति दर्शनम्। येन तत्त्वं दृश्यते तद्दर्शनम् । दर्शनं यथार्थतः ज्ञानचक्षुः भवति।

चरकमहर्षिः चरकसंहितायां सूत्रस्थाने एवं सूचयति 'शास्त्रं ज्योतिः, प्रकाशार्थं दर्शनं बुद्धिरात्मनः' इति। दर्शनेषु किं दृष्टम्? दृष्टेषु कार्येषु किं सत्यम्? वयं के? कस्मादस्माकम्

उत्पत्तिः? प्रपञ्चोत्पत्तिः कदा, केन जाता? प्रपञ्चसृष्टा कः? प्रपञ्चस्य कर्तव्यं किम्? इत्यादिकानि कार्याणि दर्शनेषु विशदयति।

**कति दर्शनानि?**

भारतीयपरम्परायां दर्शनानि द्विधा विभज्यन्ते। आस्तिकदर्शनानि, नास्तिकदर्शनानि चेति।

**आस्तिकदर्शनानि-**

प्रधानतया आस्तिकदर्शनानि षट्। आस्तिकदर्शनानि वेदस्य प्रामाण्यमङ्गीकुर्वन्ति। अतः वैदिकदर्शनानि इति नामान्तरम्। प्रायेण वैदिकदर्शनानि ईश्वरस्य सद्भावमङ्गीकुर्वन्ति।

| **दर्शननाम** | **आचार्यस्य नाम** |
|---|---|
| १. साङ्ख्यदर्शनम् | - कपिलमहर्षिः । |
| २. योगदर्शनम् | - पतञ्जलिमहर्षिः । |
| ३. न्यायदर्शनम् | - गौतममहर्षिः । |
| ४. वैशेषिकदर्शनम् | - कणादमहर्षिः । |
| ५. पूर्वमीमांसादर्शनम् | - जैमिनिमहर्षिः । |
| ६. वेदान्तदर्शनम् (उत्तरमीमांसादर्शनम्) | - बादरायणः । (व्यासमहर्षिः) |

एतदतिरिक्तानि अद्वैतदर्शनं, विशिष्टाद्वैतदर्शनम् इत्यादीनि सन्ति। तानि वेदान्तदर्शनस्य भेदाः एव ।

**नास्तिकदर्शनानि-** प्रधानतया नास्तिकदर्शनानि त्रीणि। वेदप्रमाण्यं नास्तिकाः नाङ्गीकुर्वन्ति। वेदप्रामाण्याभावात् अवैदिकदर्शनानि इति नामान्तरम्। नास्तिकाः वेदनिन्दकाः इति मनुस्मृतिः।

| **नास्तिकदर्शनानि** | **- आचार्यनाम** |
|---|---|
| १. चार्वाकदर्शनम् | - बृहस्पतिः |
| २. बौद्धदर्शनम् | - गौतमबुद्धः |

३. जैनदर्शनम् (आर्हतदर्शनम्)          - वर्धमानमहावीरः

एतदतिरिक्तानि कानिचन दर्शनानि सन्ति। यथा -पाशुपातदर्शनम्, रसेश्वरदर्शनम् इत्यादीनि।

## लघुविवरणानि ।

## कपिलमहर्षेः सांख्यदर्शनम्।

सङ्ख्यायते सम्यक् ज्ञायते तत्त्वं येनेति सांख्यम्। संख्याशब्दस्य गणना, प्रसिद्धिः इत्यर्थद्वयं वर्तते। पञ्चविंशतितत्त्वानां विशदीकरणम् आचार्येण कपिलमुनिना प्रोक्तम्। एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषः इति पञ्चविंशतिः तत्त्वानि। प्रकृतेः पुरुषस्य च महत्वप्रतिपादनरूपो बोधः संख्यायते इति सांख्यम्। प्रत्यक्षम्, अनुमानम्, आगमः च इति त्रीणि प्रमाणानि। अतिपुरातनं दर्शनं भवति सांख्यदर्शनम्।

## पतञ्जलिमहर्षेः योगदर्शनम् ।

सेश्वरसाख्यदर्शनमेव योगदर्शनम्। युज्यते मनो अनेन इति योगः। योगः चित्तवृत्तिनिरोधः। चित्तवृत्तिनिरोधेन चेतसः समाहितत्वम्। योगस्य अष्टौ अङ्गानि। तानि यम-नियम- आसन प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभेदाः। तत्र अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहः यमाः। यमः आत्मनियन्त्रणम्। विषयेभ्यो इन्द्रियाणां नियन्त्रणं यमः। जीवसन्धारणाय अनुष्ठातुं योग्याः नियमाः। शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि नियमाः। स्थिरसुखम् आसनम्। श्वासप्रश्वासनिरोधः प्राणायामः। शरीरायावश्यकम् ऊर्जदायकरूपेण श्वासोच्छ्वासक्रमः साध्यः। मनोऽकर्षकेभ्यः विषयेभ्यः इन्द्रियाणां नियन्त्रणं प्रत्याहारः। चित्तस्य एकाग्रता धारणा। मायातः जीवात्मनः मोक्षः समाधिः कैवल्यप्राप्तिः (मोक्षप्राप्तिः) एव सांख्यानुसारं जीवितलक्ष्यम्। अभ्यासेन वैराग्येण च योगसिद्धिः जायते। योगदर्शनं प्रत्यक्षम्, अनुमानं, शब्दः (आगमः) इति प्रमाणत्रयम् अङ्गीकरोति ।

## वैशेषिकदर्शनम्। (काणाददर्शनम्)।

कणादमहर्षिः तपसा परमेश्वरं ध्यात्वा, सन्तुष्टेन परमेश्वरेण उलूकरूपं धृत्वा समुपदिष्टत्वात् अस्य वैशेषिकदर्शनस्य औलूक्यमिति नामान्तरमस्ति। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया स्वीकारादस्य वैशेषिकमिति नाम। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति ते कथयन्ति । चत्वारि प्रमाणानि। प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः इति।

## गौतममहर्षेः न्यायदर्शनम्।

मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थः येनेति न्यायः। षोडशपदार्थज्ञानेन निःश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

## जैमिनिमहर्षेः मीमांसादर्शनम् ।

आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। पूर्वमीमांसादर्शने केरलदेशस्य योगदानं महदेव। केरले जातं शाबरभाष्यं महत् स्थानं वहति। शबरस्वामिना रचितं भाष्यमेव शाबरभाष्यम्। मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते। कुमारिलभट्टस्य भाट्टमतम्, तथा प्रभाकरस्य प्राभाकरमतञ्च। भाट्टमतानुसारं षट् प्रमाणानि सन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिश्च। किन्तु प्राभाकरमते अनुपलब्धिः न प्रमाणम्।

## वेदान्तदर्शनम्।

वेदस्योत्तरभागप्रतिपादनात् उत्तरमीमांसादर्शनमिति नाम वर्तते। वेदान्तो नाम वेदानाम् अवसानभागः। अन्तशब्दस्य ज्ञानार्थमप्यस्ति। अतः वेदान्तो नाम वेदज्ञानार्थप्रतिपादकः। ब्रह्मसूत्रप्रणेता बादरायणः पाराशरः वेदान्तदर्शनस्य उपज्ञाता भवति। ब्रह्मसूत्रे चत्वारो अध्यायाः। प्रत्यध्यायं चत्वारः पादाः। ब्रह्मसूत्रोऽयं ग्रन्थः चतुरध्यायी, चतुर्लक्षणी इत्यादिभिः नामभिः प्रख्यातः। वेदान्ते प्रस्थानत्रयं प्रसिद्धमेव। प्रस्थानत्रये उपनिषदः, भगवद्गीता, ब्रह्मसूत्रं चान्तर्भवन्ति। वेदान्ते प्रधानतया पञ्च विभागाः सन्ति। ते अद्वैतः, विशिष्टाद्वैतः, द्वैतः, शुद्धाद्वैतः, द्वैताद्वैतश्च। वेदान्तिनः षट् प्रमाणानि अङ्गीकुर्वन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिः च।

## नास्तिकदर्शनानि।(अवैदिकदर्शनानि)

नास्तिकाः वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति । वेदाः मानवरचिताः अथवा मानवसृष्टारः इति ते विचारयन्ति। प्रधानतया नास्तिकदर्शनानि त्रिधा। तानि चार्वाकदर्शनं, बौद्धदर्शनं, जैनदर्शनं च भवन्ति।

## चार्वाकदर्शनम्।

चारु वाकः चार्वाकः । चारु इत्यस्याकर्षकमित्यर्थः। वाक् इत्यस्य वाणी इत्यर्थः। अस्य दर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। अस्यापरं नाम भवति लोकायतदर्शनमिति। जनानां मध्ये प्रचुरप्रचारत्वादेव एतन्नाम। लोकः जनः। आयतः इत्यस्य विस्तृतः इत्यर्थः चार्वाकः कः इत्यस्मिन् कार्ये पण्डिताः भिन्नाभिप्रायान् मन्यन्ते। अन्ये केचन बृहस्पतेः शिष्यः इति मन्यन्ते।

सर्वेभ्यः दर्शनेभ्यः प्राचीनतममपि अस्य दर्शनस्य प्रामाणिको ग्रन्थः न दृश्यते। चार्वाकमते चत्वारि तत्त्वानि। तानि पृथिव्यप्तेजोवायुरूपाणि। कामः एवैकः पुरुषार्थः। मरणमेव मोक्षः। प्रत्यक्षमेव प्रमाणम्। धर्मचिन्ता न वर्तते। सुखं दुःखं च स्वभावेनेव भवतः। तत्र धर्माधर्मौ न कारणम्।

## बौद्धदर्शनम् ।

बौद्धदर्शनस्योपज्ञाता भवति गौतमबुद्धः। सोऽयं क्रिस्तोः पूर्वे पञ्चमे शतके जीवितमधारयत्। सहस्रवर्षकालं भारते प्रचुरप्रचारस्य अस्य दर्शनस्य महती प्रसक्तिरवर्तत। अस्य दर्शनस्य अनेके ग्रन्थाः सन्ति। किन्तु भगवता बुद्धेन रचितः ग्रन्थः न दृश्यते। बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपत् चेति चत्वारि सत्यानि सन्ति। दुःखं तु सार्वत्रिकः क्लेशः। निखिलस्य दुःखस्य कारणमविद्यैव । अविद्यावशंगतः जीवः लोकं अहर्निशं भ्रमति। बौद्धनये जीवः जगत् च अनित्यं तथा प्रतिक्षणं परिणामविधेये च। प्रत्यक्षम्, अनुमानम् इति प्रमाणद्वयं बौद्धेनाङ्गीकृतमेव।

## जैनदर्शनम् ।

जैनदर्शनस्योपज्ञाता वर्धमानमहावीरः भवति। तस्यापरं नाम भवति जिनः इति। अस्य दर्शनस्य अपरं नाम आर्हतमतम् इति। बौद्धदर्शनं वेदानां प्रामाण्यं न स्वीकरोति। तथापि दर्शनस्यास्य बीजं वेदेष्वेव दृश्यते। रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते। सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यक् चरित्रं च रत्नत्रयम्। आचार्याणामुपदेशानुसरणं सम्यक् ज्ञानम्। आचार्यवचनेषु विश्वासः सम्यग्दर्शनम्। तदनुसारं जीवितवृत्तिकरणं सम्यक् चरित्रम्। जैनदर्शने त्रीणि प्रमाणानि- प्रत्यक्षम्, अनुमानम्, आगमः चेति।

## पाशुपतदर्शनम् ।

पाशुपतदर्शनम् अवैदिकदर्शने अन्तर्भवति। अन्धविश्वासाः अस्मिन् रूढमूलत्वात् शङ्कराचार्येण कालान्तरे अस्य तिरस्काराय श्रममकरोत् इति श्रूयते । अस्मिन् दर्शने परमात्मरूपेण (शिवं) अङ्गीकरोति ।

## रसेश्वरदर्शनम्।

शैवदर्शनेषु अन्यतमं भवति रसेश्वरदर्शनम्। अस्मिन् रसमेव ईश्वरत्वेन गणयति। जीवन्नेव मोक्षं प्राप्तुं अनेन दर्शनेन शक्यते इति तेषां विश्वासः।

**पुनरावृत्तिः (Recap)**

- भारते अनेकानि दर्शनानि प्रचरितानि भवन्ति।
- दर्शनानि आस्तिकानि नास्तिकानि इति द्विधा विभक्तानि ।
- वेदप्रामाण्यं यानि दर्शनानि अङ्गीकुर्वन्ति तानि आस्तिकानि ।
- वेदप्रामाण्यं यानि नाङ्गीकुर्वन्ति तानि नास्तिकानि ।
- प्रधानतया षड् आस्तिकदर्शनानि । प्रमुखानि त्रीणि नास्तिकदर्शनानि ।
- कपिलमुनिरेव सांख्यदर्शनम् इति आस्तिकदर्शनस्य उपज्ञाता।
- योगदर्शनस्य आचार्यः पतञ्जलिमुनिरेव ।
- कणादः वैशेषिकदर्शनस्य उपज्ञाता।
- गौतममहर्षिः न्यायदर्शनस्य प्रवक्ता।
- मीमांसादर्शनस्य उपज्ञाता जैमिनिमहर्षिरेव।
- कुमारिलमतानुयायिनः भाट्टमीमांसकाः प्राभाकरमतानुयायिनः प्राभाकरमीमांसकाः इति श्रूयते।
- वेदान्तदर्शनस्य उपज्ञाता भगवान् वेदव्यासः।

- नास्तिकदर्शनेषु प्रमुखस्य चार्वाकदर्शनस्य उपज्ञातृरूपेण बृहस्पतिं मन्यन्ते केचन दार्शनिकाः।
- बौद्धदर्शनस्य उपज्ञाता गौतमबुद्धः ।
- जैनदर्शनस्य प्रवक्ता वर्धमानमहावीरः ।
- पाशुपतदर्शनम् अवैदिकदर्शने अन्तर्भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कस्मात् धातोः दर्शनशब्दः निष्पन्नः?
2. किं नाम दर्शनम्?
3. भारतीयदर्शनानां द्वौ विभागौ कौ?
4. सांख्यदर्शनस्य आचार्यः कः ?
5. योगदर्शनस्य अपरं नाम किम्?
6. वैशेषिकदर्शनस्य प्रवक्ता कः ?
7. वैशेषिकदर्शने पदार्थाः कति ?
8. वैशेषिकदर्शने प्रमाणं कति विधम्?
9. न्यायदर्शनस्य आचार्यः कः?
10. न्यायदर्शने कति पदार्थाः?
11. पूर्वमीमांसादर्शनस्य कर्ता कः ?
12. भाट्टमीमांसामते प्रमाणानि कति?
13. उत्तरमीमांसादर्शनस्य आचार्यः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. आस्तिकदर्शननि कानि?
2. नास्तिकदर्शनानि कानि ?
3. सांख्यदर्शने कति प्रमाणानि सन्ति? कानि च तानि?
4. सांख्यदर्शने कति तत्त्वानि सन्ति? कानि च तानि?
5. योगः नाम किम्?
6. योगदर्शने कति अङ्गानि सन्ति? कानि च तानि?
7. योगसूत्रे प्रतिपादिताः नियमाः के? .
8. जैनदर्शने वर्तमानं रत्नत्रयं किम्?
9. वैशेषिकदर्शने कति पदार्थाः सन्ति? कानि च तानि?
10. न्यायदर्शने कति पदार्थाः सन्ति? कानि च तानि?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

टिप्पणि लिखत-

1. सांख्यदर्शनम् ।
2. योगदर्शनम् ।
3. न्यायदर्शनम् ।
4. वैशेषिकदर्शनम् ।
5. पूर्वमीमांसादर्शनम् ।
6. वेदान्तदर्शनम् ।
7. चार्वाकदर्शनम् ।

8. बौद्धदर्शनम् ।
9. जैनदर्शनम् ।

## निर्दिष्टाभ्यासाः (Assignments)

1. आस्तिकदर्शनानि विशदयत।
2. नास्तिकदर्शनानि विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. दृशिर् धातोः ।
2. दृश्यते यथार्थतत्त्वम् अनेन इति दर्शनम्।
3. आस्तिकदर्शनं, नास्तिकदर्शनं च इति।
4. कपिलाचार्यः।
5. सेश्वरसांख्यम् ।
6. कणादमहर्षिः ।
7. षट्।
8. चत्वारि।
9. गौतमः।
10. षोडश ।
11. जैमिनिमहर्षिः ।
12. षट्।
13. बादरायणः ।

SGOU

## सूचनाग्रन्थौ (References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास् अकादमि वाराणसि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः,चौखम्बा विद्याभवन्, वारणासि ।


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian hilosophy, Dr. S.Radhakrishnan, Vol-I & II, MLBD, Varanasi, Delhi
3. Outlines of Indian Philosophy, Jadunath Sinha, New Central Book Agency, Culcutta, 1992.
4. Encyclopedia of Indian Philosophies, Karl.H.Potter, Vol I, II,III, IV,V Motilal Banarasidas, Delhi 1977 .
5. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass PublishersPrivateLimited, Delhi, 2000

# Unit-2
# न्यायवैशेषिकयोरुत्पत्तिविकासौ

## उद्देश्यानि(Learning Outcomes)

- दर्शन विषयान् जानाति।
- दर्शनस्य प्राधान्यं ज्ञास्यति।
- न्यायवैशेषिकदर्शनयोः अवबोधः।
- तत्वशास्त्रे युक्तिविचारं निरूपयति ।
- न्यायवैशेषिकयोः साम्यतां वैधर्म्यं च वेत्स्यति।

## प्राग्व्यपेक्षाः(Pre requisites)

भारतं दर्शनानां धरा भवति। अनेकानि दर्शनानि भारते सञ्जातानि। इदानीं दर्शनमिति स्थाने तत्वचिन्ता, तत्वशास्त्रं इति पदद्वयमपि उपयुज्यते। भारतीयपरम्परायां दर्शनानि द्विधा विभज्यन्ते। आस्तिकदर्शनानि, नास्तिकदर्शनानि चेति। तेषु दर्शनेषु प्रधानौ भवतः न्यायवैशेषिकौ। भारतीयदर्शनसाहित्यस्य प्रवेशनद्वारमिव भवति न्यायदर्शनम्। मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। वस्तुतस्तु वैशेषिक एव न्यायात्प्राचीनतरः। कणादः एवास्य दर्शनस्य आद्यः प्रवक्ता। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया स्वीकाराद् वैशेषिकमिति नाम। प्रपञ्चघटकानां अध्ययनेनैव तदाधारभूतं तत्वम् अवगम्यते इति वैशेषिकसिद्धान्तः। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति वैशेषिकाः कथयन्ति। द्वे प्रमाणे- प्रत्यक्षम्, अनुमानम्, च इति। न्यायदर्शनस्य उपज्ञाता गौतममहर्षिः एव। अस्य दर्शनस्य अपरे नामधेये भवतः प्रमाणशास्त्रं तर्कशास्त्रं चेति । षोडशपदार्थतत्त्वज्ञानेन निःश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रत्यक्षम्,

| |
|---|
| अनुमानम्, उपमानम्, शब्दः इति चत्वारि प्रमाणानि अङ्गीक्रियन्ते। |

**मुख्यपदानि(Key words)**

दर्शनं, न्यायं, वैशेषिकं, पदार्थः, द्रव्यं, गुणः, कर्मं, सामान्यं, विशेषं, समवायः, अभावः, प्रमाणं, न्यायसूत्रकारः, गौतमः, कणादः।

**Discussion**

## न्यायवैशेषिकदर्शनयोः कतरः प्राचीनः।

न्यायवैशेषिकयोः कतरः प्राचीन इति विषये पण्डिताः त्रिविधं मतं प्रकटयन्ति।

1.न्यायः वैशेषिकात्प्राचीनतरः।

2.वैशेषिको न्यायात्प्राचीनतरः।

3.उभयोः समानकालिकत्वं चेति।

'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तारः।
धर्मशास्त्रं पुराणञ्च विद्या एताश्चतुर्दश॥' इति मनुस्मृतिः।

अत्र वैशेषिकस्य न्यायविस्तारे एवान्तर्भावात् न्यायः वैशेषिकात्प्राचीनतरः इति केचित्। 'कणादन्यायमतयोः इत्युल्लेखात्' वैशेषिके पदार्थानां षड्विधत्वम् उक्तम्। तस्यैव षड्विधस्य षोडशपदार्थत्वेन न्याये विस्तरात् वैशेषिकस्य न्यायापेक्षया प्राचीनत्वं इत्यपरे। शिवस्य सप्तविंशतितमः अवतारः भवति सोमशर्मा। तस्य द्वौ शिष्यौ अक्षपादः, कणादः चेति। तौ न्यायवैशेषिकाभ्यां शास्त्रद्वयं व्यरचयताम्। इदं शास्त्रद्वयं माहेश्वरम् इति वायुपुराणकथा। अतः केचन उभयोः दर्शनयोः समकालिकत्वं मन्यन्ते।

## 1.3 वैशेषिकदर्शनम् ।

वैशेषिकदर्शनं सर्वेषामेव न्यायपूर्वोत्तरमीमांसादि दर्शनानां सकलशास्त्रोपकारकं परमपुरुषार्थोपयोगि च। तत्र भवान् कणादः स्वतपसा शिवम् आराधयामास। सन्तुष्टेन

परमेश्वरेण उलूकरूपं धृत्वा परमार्थसत्वम् उपदिदेश। तेन कणादमहर्षिः दशलक्षणात्मकं वैशेषिकशास्त्रं रचितवान्। यथोक्तं -

"योगाचार विभूत्या यस्तोषयित्वा महेश्वरम्।
चक्रेवैशेषिकं शास्त्रं तस्मै कणमुने नमः॥"

उलूकरूपधारिणा महेश्वरेणोपदिष्टत्वात् दर्शनमिदम् उलूक्यनाम्नापि प्रसिद्धम्। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया स्वीकारादेवास्य वैशेषिकमिति नाम। प्रकरणदृष्ट्या वैशेषिक एव न्यायात्प्राचीनतरः। वैशेषिकसूत्राणां व्याख्यानरूपेण 'प्रशस्तपादभाष्यम्' इति ग्रन्थः प्रशस्तपादेन रचितः। अस्य प्रशस्तपादस्य कालः प्रायेण क्रिस्त्वनन्तरे चतुर्थे शतके एवासीत्। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति ते कथयन्ति। किन्तु केचन वैशेषिकाः अभावपदार्थं सप्तपदार्थत्वेन स्वीकुर्वन्ति। प्रत्यक्षम्, अनुमानं चेति द्वे प्रमाणे। वैशेषिकदर्शनं प्रमेये प्राधान्यं कल्पयति।

### 1.4 वैशेषिकदर्शनस्य उत्पत्तिः विकासः च ।

वस्तुतस्तु प्रकरणदृष्ट्या वैशेषिक एव न्यायात् प्राचीनतरः। कणादोऽस्य आद्यः प्रवक्ता। सः महर्षिः वैशेषिकसूत्रमिति ग्रन्थं रचितवान्। तस्य च वैशेषिकसूत्रम् इति ग्रन्थः सम्प्रति समुपलभ्यते। तस्मिन् ग्रन्थे दश अध्यायाः सन्ति। प्रत्यध्याये द्वे आह्निके स्तः। अस्य आचार्यस्य कालः क्रिस्तोः पूर्वं पञ्चमशतकात्पूर्वम् इति गणयन्ति गवेषकाः। अयं कणादः, कणभुक्, कणभक्षः, उलूकः इत्यादिभिः नामभिः प्रसिद्धः।

क्रिस्तोः दशमे शतके जातेन व्योमशिखाचार्येण रचितः व्योमवती नामकः ग्रन्थः तथा उदयनाचार्यस्य 'किरणावली' नामकः ग्रन्थः च प्रशस्तपादभाष्यस्य टीके आस्ताम्। एकादशे शतके जातस्य वल्लभाचार्यस्य 'लीलावती' च प्रशस्ता अन्या टीका आसीत्।

## न्यायदर्शनस्योत्पत्तिः विकासः च।

मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थाः येनेति न्यायः। षोडशपदार्थतत्वज्ञानेन निःश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रमाण- प्रमेय- संशय- प्रयोजन- दृष्टान्त- सिद्धान्त- अवयव- तर्क- निर्णय- वाद- जल्प- वितण्डा- हेत्वाभास- च्छल- जाति- निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः। प्रत्यक्षानुमानउपमानशब्दाः प्रमाणानि। प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मक पञ्च अवयववाक्यमिति ।

न्यायदर्शनस्योपज्ञाता गौतममहर्षिः एव। सोऽयं अक्षपादः इति नाम्ना विख्यातोऽभूत्। तेन रचितं भवति न्यायसूत्रम्। सः क्रिस्तोः पूर्वे चतुर्थे शतके अजायत इति चरित्रकाराः। स्वसम्मतसिद्धान्तान् दृढीकर्तुं विरोद्धृभ्यः आत्मानं ज्ञातुं न्यायशास्त्रमुपकरोति।

न्यायदर्शनस्य प्रयोजनं वेदविरोधितर्कनिरसनोपाधिकं वैदिकसिद्धान्तरक्षणोपयोगि प्रमाणादि प्रतिपादनमेव। इदं शास्त्रं प्रमाणशास्त्रं, तर्कशास्त्रं चोच्यते। तत्र प्रमीयते अनेन इति प्रमाणं, तस्य शास्त्रं प्रमाणशास्त्रं, तर्क्यन्ते प्रतिपाद्यन्ते विषयाः अनेन इति तर्काः, तेषां शास्त्रं तर्कशास्त्रम्। तर्क्यन्ते प्रमाविषयीक्रियन्ते अर्थाः इति। क्रिस्त्वनन्तरे द्वितीये शतके जातः 'वात्स्यायनः' न्यायसूत्रस्य भाष्यं रचितवान्। वात्स्यायनस्य अपरं नाम भवति पक्षिलस्वामी इति। षष्ठशतके जातस्य भारद्वाजस्य उद्योतकारस्य कृतिः भवति न्यायवार्तिकम् । इयं कृतिः बौद्धेन दिङ्नागेन कृतस्य न्यायभाष्यस्य खण्डनस्य खण्डनपरा भाष्यमण्डनपरा चासीत्। नवमे शतके जातेन वाचस्पतिमिश्रेण प्रणीता टीका भवति न्यायवार्तिकटीका। दशमे शतके जातः उदयनाचार्यः बौद्धमतखण्डनपूर्वकः ग्रन्थः भवति तात्पर्यपरिशुद्धिः। उदयनाचार्येण आत्मतत्त्वविवेकः, किरणावली, न्यायपरिशिष्टं, न्यायकुसुमाञ्जलिः इति प्रसिद्धाः न्यायग्रन्थाः रचिताः। अस्मिन्नेव काले जातेन जयन्तभट्टेन न्यायमञ्जरी नामिका टीका रचिता। सा टीका न्यायसूत्रस्य विशिष्टा टीकैव।

## नव्यन्यायदर्शनस्य उत्पत्तिविकासः ।

भारते दशमे-एकादशशतके च बौद्धदर्शनस्य प्राधान्यं प्रायेण विनष्टमभूत्। यद्यपि न्यायधार्मिकभेदाः दर्शनेषु व्यतियानाय प्रेक्षिताः। तथापि कानिचन समानकार्याणि वैशेषिकदर्शने द्रष्टुं शक्यते। यथा-

1.कार्यकारणभावः तदनुकूला चिन्ताधारा ।

2.लक्ष्ये समानता ।

3.उभयोः प्रयोजनं मोक्षप्राप्तिरेव ।

वैशेषिकदर्शनं प्रमेये प्राधान्यं कल्पयति। न्यायदर्शनं तु प्रमाणेषु। तर्कस्य युक्तेः परीक्षायाः परीक्षानिरीक्षणस्य च प्राधान्यं न्यायदर्शने वर्तते। अतः उभयोः प्राधान्यं स्वीकृत्य नूतना काचन सरणिराविर्भूता। सा सरणिः भवति नव्यन्यायः अथवा कणादन्यायसिद्धान्तः। तर्कसिद्धान्तमिति अपरं नाम च लब्धम्।

नव्यन्यायदर्शनस्य प्रवर्तकः आसीत् गङ्गेशोपाध्यायः। सः द्वादशे शतके तत्त्वचिन्तामणिः इति ग्रन्थं रचितवान्। तस्मिन् चत्वारः अध्यायाः सन्ति। प्रत्यक्षानुमानोपमानशब्दानि प्रमाणानि अस्मिन् विशदयति। द्वादशशतकादारभ्य इदम्पर्यन्तं नव्यन्यायदर्शने अनेके ग्रन्थाः संजाताः। बह्वयः टीकाः च जाताः। तेषु भेदाभेदोपकारप्रदः ग्रन्थः भवति 'तर्कसंग्रहः'। तस्य ग्रन्थस्य कर्ता आसीत् सप्तदशशतके आन्ध्राराज्ये आर्काट्ट् प्रविश्यायां लब्धजन्मा अन्नम्भट्टमहाशयः। अयं ग्रन्थः न्यायवैशेषिकदर्शनयोः प्रामाणिकग्रन्थः। अस्य ग्रन्थस्य चतुर्त्रिंशट्टीकाः संस्कृते संजाताः।

### पुनरावृत्तिः(Recap)

- न्यायवैशेषिकमतयोः वैशेषिकदर्शनं न्यायात्प्राचीनतरः ।
- कणादमहर्षेः जीवितकालं क्रिस्तोः पूर्वं पञ्चमे शतके इति गणयन्ति गवेषकाः।
- गौतममहर्षेः कालः क्रिस्तोः पूर्वं चतुर्थे शतके इति गणयन्ति।

- न्यायवैशेषिकदर्शनयोः परस्परं सादृश्यदर्शनात् लक्ष्ये ऐक्यदर्शनाच्च परस्परं मिलित्वा नव्यन्यायदर्शनरूपेण (तर्कशास्त्ररूपेण) नूतना सरणिरारब्धा।
- क्रिस्त्वनन्तरं द्वादशे शतके नव्यन्यायप्रवर्तिकारूपस्य तत्त्वचिन्तामणिग्रन्थस्य रचना गङ्गेशोपाध्यायः कृतवान् ।
- निःश्रेयसमेव उभयोः दर्शनयोः मुख्यतत्त्वम् ।
- नव्यन्यायदर्शनस्य प्रवर्तकः आसीत् गङ्गेशोपाध्यायः। सः द्वादशे शतके तत्त्वचिन्तामणिः इति ग्रन्थं रचितवान्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. नव्यन्यायदर्शनस्य प्रवर्तकः कः?
2. गौतममहर्षेः अपरनामं किम्?
3. तत्त्वचिन्तामणिः इति ग्रन्थस्य कर्ता कः?
4. 'किरणावली' नामकस्य ग्रन्थस्य कर्ता कः?
5. प्रशस्तपादेन रचितः ग्रन्थः कः?
6. न्यायदर्नस्य अपरनामधेये के?
7. --- एव न्यायवैशेषिकदर्शनयोः मुख्यतत्त्वम् ।(रिक्तं पूरयत)
8. वाचस्पतिमिश्रेण रचितः टीका का ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. तर्कशास्त्रपदस्य उत्पत्तिः ।
2. प्रमाणशास्त्रपदस्य उत्पत्तिः का?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. न्यायदर्शनस्य उत्पत्तिः विकासश्च प्रतिपादयत।
2. वैशेषिकदर्शनस्य उत्पत्तिः विकासश्च प्रतिपादयत ।
3. नव्यन्यायदर्शनस्य उत्पत्तिः विकासश्च प्रतिपादयत ।

## निर्दिष्टाभ्यासः(Assignment)

1. न्यायदर्शनम् अधिकृत्य लिखत।
2. वैशेषिकदर्शनम् अधिकृत्य लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. गङ्गेशोपाध्यायः।
2. अक्षपादः।
3. गङ्गेशोपाध्यायः।
4. उदयनाचार्यः।
5. प्रशस्तपादभाष्यम्।
6. प्रमाणशास्त्रं, तर्कशास्त्रं चेति ।
7. निःश्रेयसम्।
8. न्यायवार्तिकटीका।

## सूचनाग्रन्थौः (References)


1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास् अकादमि वाराणसि,1998

2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः,चौखम्बा विद्याभवन्, वारणासि ।

## अधिकवाचनग्रन्थाः (Suggested Readings)

1. History of Indian Philosophy , Surendranath Das Guptha , Vol-III, MLBD, Varanasi
2. Indian Philosophy - Dr.S.Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal BanarsidassPublishersPrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha ,New Central Book agency,Culcutta, 1992.

# Unit-3
# मूलतत्त्वानि प्रमुखग्रन्थाश्च

## उद्देश्यानि(Learning Outcomes)

- दर्शनस्य प्राधान्यं ज्ञास्यति।
- दर्शनविषयान् ग्रहिष्यति।
- दार्शनिकानां प्रमाणतत्त्वविचारविषयावगमनम् ।
- न्यायवैशेषिकदर्शनस्य प्रमुखग्रन्थाः ग्रहिष्यति।

## प्राग्व्यपेक्षाः(Pre requisites)

मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम्। षोडशपदार्थज्ञानेन निःश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निश्रेय-साधिगमः। बहुषु तर्कग्रन्थेषु सत्स्वपि शास्त्रग्रहणपटूनां छात्राणां अनायासेन तर्कशास्त्रप्रवेशनाय तर्कसंग्रहः प्रयोजनकरः।

## मुख्यपदानि(Key words)

मूलतत्त्वं, जीवात्मा, परमात्मा, मोक्षप्राप्तिः, ईश्वरः, निःश्रेयसः।

## Discussion

### वैशेषिकदर्शनस्य मूलतत्त्वानि ।

वैशेषिकदर्शने निःश्रेयसमेव मुख्यविषयः। द्रव्यगुणकर्मसमवायसामान्यविशेषणानां साधर्म्यवैधर्म्याभ्यां मोक्षप्राप्तिः। जीवात्मा ज्ञानस्वरूपः। परमात्मा ईश्वरः। जीवात्मा सुखदुःखादिविषयी। परमात्मा तु शुद्धः तत्त्वज्ञानेन मिथ्यावासनां नश्यति। यः सुखदुःखापगमः स एव मोक्षः।

## प्रमुखाः ग्रन्थाः।

कणादः एव वैशेषिकदर्शनस्याद्यः प्रवक्ता। सः वैशेषिकसूत्रम् इति ग्रन्थं रचितवान्। तस्मिन् ग्रन्थे दश अध्यायाः सन्ति। प्रत्यध्यायं द्वे आह्निके स्तः। आहत्य विंशत्याह्निकानि। वैशेषिकसूत्राणां अनेकाः टीकाः सन्ति। प्रशस्तपादेन रचितं प्रशस्तपादभाष्यं व्योमशिखाचार्यस्य 'व्योमवती', उदयनाचार्यस्य 'किरणावली', वल्लभाचार्यस्य 'लीलावती' च प्रसिद्धाः टीकाः। अपि च शङ्करमिश्रस्य उपस्करः, जयनारायणस्य कणादसूत्रवृत्तिः चन्द्रकान्तस्य वैशेषिकभाष्यं च वैशेषिकग्रन्थेषु प्रमुखाः ग्रन्थाः भवन्ति।

## न्यायदर्शनस्य मूलतत्त्वानि।

वेदविरोधितस्य तर्कस्य निरसनाय वैदिकसिद्धान्तरक्षणाय च बहूपकारकाणि भवन्ति न्यायदर्शनस्य मूल्यतत्त्वानि । मोक्षप्राप्तिः फलं भवति। न्यायशास्त्रे षोडशपदार्थाः। प्रमाणानां सविस्तरप्रतिपादनमस्मिन् दर्शने वर्तते। नव्यन्याये अवच्छेदावच्छिन्नादिप्रयोगः दृश्यते।

गौतममहर्षिरस्य दर्शनस्य प्रवक्ता । तेन न्यायसूत्रं रचितम्। तस्मिन् पञ्चाध्यायाः दशाह्निकानि चतुर्नवतिः प्रकरणानि च सन्ति। यथार्थज्ञानमेव निःश्रेयससिद्धिः। यथार्थज्ञानं तु प्रमाण- प्रमेय-संशय- प्रयोजन- दृष्टान्त-सिद्धान्त- अवयव- तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास- च्छल- जाति- निग्रहस्थानानां तत्त्वज्ञानेन लभते। जन्मदुःखप्रवृत्तिदोष-मिथ्याज्ञानानां विनाशेन अपवर्गः (मोक्षः) जायते।

## न्यायदर्शने वर्तमानाः प्रमुखाः ग्रन्थाः ।

गौतममहर्षिणा रचितः ग्रन्थः न्यायसूत्रम् ।

न्यायभाष्यम् पक्षिलस्वामिनामकेन वात्स्यायनेन प्रणीतम् ।

न्यायवार्तिकम् - उद्योतकरेण रचितम्।

न्यायवार्तिकटीका- वाचस्पतिमिश्रेण रचिता टीका भवति।

तात्पर्यपरिशुद्धिः- उदयनाचार्यप्रणीतोऽयं बौद्धमतखण्डनपरः ग्रन्थः ।

आत्मतत्त्वविवेकः, किरणावली, न्यायपरिशिष्टम्, न्यायकुसुमाञ्जलिः एतच्चतुष्टयम् अपि

**नव्यन्यायदर्शनस्य प्रसिद्धाः ग्रन्थाः ।**

द्वादशे शतके गङ्गेशोपाध्यायः तत्त्वचिन्तामणिः नामकं ग्रन्थं रचितवान्। कृतिरियं नव्यन्यायप्रवर्तिका। तत्त्वचिन्तामणि ग्रन्थे चत्वारः अध्यायाः सन्ति। प्रत्यध्यायम् एकैकं प्रमाणं विशदीकरोति। अनेके टीकाः अस्य ग्रन्थस्य संजाताः ।

त्रयोदशे शतके जयदेवेन (पक्षधरमिश्रेण) तत्त्वचिन्तामण्यालोकः नाम टीका रचिता।

पञ्चदशे शतके वासुदेवसार्वभौमेन सार्वभौमनिरुक्तिः नाम टीका रचिता। सापि तत्त्वचिन्तामणिम् अवलम्ब्यैवासीत्। षोडशे शतके रघुनाथशिरोमणिः नामकः आचार्यः दीधितिनामिकां टीकां रचितवान् ।

सप्तदशे शतके जगदीशः जगदीशनामिकां टीकां रचितवान्। एतदतिरिक्तं शब्दशक्तिप्रकाशिका, न्यायादर्शः, तर्कामृतं, पदार्थतत्त्वनिर्णयः चास्य प्रसिद्धाः ग्रन्थाः भवन्ति। अस्मिन्नेव काले गदाधराचार्येण रचिता टीका भवति गादाधरी। अस्यैव शक्तिवादः, व्युत्पत्तिवादः, विषयतावादः इत्याद्याः ग्रन्थाः प्रसिद्धाः भवन्ति। सप्तदशशतकान्तं यावत् नव्यन्यायसिद्धान्ताः प्रचुरप्रचारे संजाताः।

न्यायवैशेषिकविभागे पठितुमुत्सुकानां छात्राणां कृते साहाय्यकरूपेण तत्त्वचिन्तमणि-दीधितिं चावलम्ब्य अनेके ग्रन्थाः रचिताः। तेषु ग्रन्थेषु केशवमिश्रस्य 'तर्कभाषा', जगदीशस्य 'तर्कामृतं', लौगाक्षिभास्करस्य 'तर्ककौमुदी', अन्नंभट्टस्य 'तर्कसंग्रहः' च प्रधानाः ।

**पुनरावृत्तिः(Recap)**

- जीवात्मा ज्ञानस्वरूपः। परमात्मा ईश्वरः।
- जीवात्मा सुखदुःखादिविषयी।
- परमात्मा तु शुद्धः तत्त्वज्ञानेन मिथ्यावासनां नाशयति। यः सुखदुःखापगमः स एव मोक्षः।
- कणादः वैशेषिकसूत्रम् इति ग्रन्थं रचितवान्।

- प्रशस्तपादेन रचितं प्रशस्तपादभाष्यं व्योमशिखाचार्यस्य 'व्योमवती', उदयनाचार्यस्य 'किरणावली', वल्लभाचार्यस्य 'लीलावती' च प्रसिद्धाः टीकाः।
- शङ्करमिश्रस्य उपस्करः, जयनारायणस्य कणादसूत्रवृत्तिः चन्द्रकान्तस्य वैशेषिकभाष्यं च वैशेषिकग्रन्थेषु प्रमुखाः ग्रन्थाः भवन्ति।
- द्वादशे शतके गङ्गेशोपाध्यायः तत्त्वचिन्तामणिः नामकं न्यायग्रन्थं रचितवान्।
- पञ्चदशे शतके वासुदेवसार्वभौमेन सार्वभौमनिरुक्तिः नाम टीका रचिता।
- सप्तदशे शतके जगदीशः जगदीशनामिकां टीकां रचितवान्।
- वैशेषिकसूत्राणां बह्वयष्टीकाः समुपलभ्यन्ते।
- प्रशस्तपादेन रचितं "प्रशस्तपादभाष्यं" वैशेषिकसूत्राणां व्याख्यानरूपेण रचितः ग्रन्थः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. वैशेषिकसूत्रे कति अध्यायाः सन्ति ?
2. वैशेषिकसूत्रस्य कर्ता कः?
3. न्यायसूत्रे कति अध्यायाः सन्ति ?
4. लीलावती इति ग्रन्थस्य कर्ता कः?
5. किरणावली इति ग्रन्थस्य कर्ता कः?
6. व्योमवती इति ग्रन्थस्य कर्ता कः?
7. न्यायभाष्यस्य कर्ता कः?
8. तर्ककौमुदी ग्रन्थस्य कर्ता कः?

### एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. न्यायशास्त्रस्य अपरनामानि कानि?
2. न्यायशास्त्रे कति प्रमाणानि सन्ति?
3. वैशेषिकदर्शने कति प्रमाणानि सन्ति?
4. वैशेषिकदर्शने कति पदार्थाः सन्ति?

### एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. वैशेषिकदर्शनस्य प्रमुखग्रन्थान् लिखत।
2. न्यायदर्शनस्य प्रमुखाचार्यान् ग्रन्थान् च अधिकृत्य लिखत।

### निर्दिष्टाभ्यासाः(Assignments)

1. न्यायदर्शनस्य मूलतत्त्वानि।
2. वैशेषिकदर्शनस्य मूलतत्त्वानि ।

### वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. दश (10)
2. कणादः
3. पञ्च (5)
4. वल्लभाचार्यः
5. उदयनाचार्यः
6. व्योमशिखाचार्यः

7. वात्स्यायनः

8. लौगाक्षिभास्करः

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६।
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८।
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Nyayasiddhanthamuktavali of Sri Viswanathapanchanana, Chaukhambha Sanskrit Sansthan, Varanasi, Rpt2011, Rs.250
2. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
3. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri**,** Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit-4
# प्रकरणग्रन्थानां परिचयः

## उद्देश्यानि(Learning Outcomes)

- न्यायदर्शने गहनावबोधं जायते।
- न्यायवैशेषिकयोः महत्वं जानाति ।
- न्यायवैशेषिकयोः साम्यतां वैधर्म्यं च जानाति।
- दर्शनविषयान् अवगच्छति।

## प्राग्व्यपेक्षाः(Pre requisites)

भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अत एव अनेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति ।

## मुख्यविचाराः(Key Concepts)

प्रकरणग्रन्थः, वेदान्तसारः, वेदान्तपरिभाषा, दीपिका, तार्किकः, मीमांसकः, वैयाकरणः।

## Discussions

शास्त्रार्थप्रतिपादकः भवति प्रकरणग्रन्थः। यस्य दर्शनस्य शास्त्रस्य वा विषयं संक्षिप्य सूचयति सः ग्रन्थः प्रकरणग्रन्थः इत्युच्यते। स एव आधिकारिकः ग्रन्थः।

वेदान्तसारः, वेदान्तपरिभाषा च वेदान्तदर्शनस्य प्रकरणग्रन्थौ स्तः। मीमांसापरिभाषा मीमांसादर्शनस्य प्रकरणग्रन्थः। केचनाचार्याः प्रकरणदर्शनस्य एवं लक्षणं वदन्ति -

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।

आहुः प्रकरणं नाम प्रकरणज्ञाः मनीषिणः।। इति ।

एकस्मात् शास्त्रात् दर्शनद्वारा केचन भागाः, अन्यस्मात् शास्त्रात् केचन भागाः च स्वीकृत्य स्वमतस्थापनाय यतन्ते चेत् स ग्रन्थोऽपि प्रकरणग्रन्थः। दर्शनयोः द्वयोः केषुचित् भागेषु साधर्म्यं वर्तितव्यम्। वैशेषिकदर्शनात् पदार्थाः पदार्थलक्षणानि च न्यायदर्शनात् प्रत्यक्षादीनि चत्वारि प्रमाणानि स्वीकृत्य नव्यन्यायदर्शनस्य आविर्भावः प्रायेण द्वादशे शतके आरब्धम्। नव्यन्यायदर्शने वर्तमानः प्रकरणग्रन्थः भवति 'तर्कसंग्रहः'।

तर्कसंग्रहस्य कर्ता आसीत् अन्नंभट्टः। सप्तदशे शतके अन्नंभट्टः अजायत। तस्य पिता **विरुमलाचार्यः आसीत्। सः राघवसोमयाजिकुलोद्भवः आसीत्। सोऽयम् इदानीन्तने आन्ध्रादेशे चिट्टूर्प्रविश्यायां प्रादुर्भूतः। सः न केवलं तार्किकः किन्तु मीमांसकः वैयाकरणः च** आसीत्।

तर्कसंग्रहे सप्तपदार्थानां विशदीकरणेन साकं कारणस्य त्रैविध्यं, प्रमाणलक्षणं, प्रमाणविशदीकरणं च सविस्तरं प्रतिपादयति। कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये द्रव्यादिसप्तपदार्थानां संग्रहः एव तर्कसंग्रहे प्रतिपादयति। दीपिका इति टीकापि अनेन रचिता।

**अन्नम्भट्टेन रचिताः ग्रन्थाः ।**

१. तर्कभाषतत्त्वबोधिनी - तर्कभाषायाः टीका।
२. भाष्यप्रदीपोद्योतनम् - व्याकरणम् ।
३. चिन्तामण्यालोकसिद्धाञ्जनम् - न्यायवैशेषिकग्रन्थः ।
४. राणकोज्जीवनी - मीमांसाग्रन्थः ।
५. मिताक्षरा
६. मीमांसाशारीरिकलघुवृत्तिः - मीमांसा ।

**पुनरावृत्तिः(Recap)**

- शास्त्रार्थप्रतिपादकः भवति प्रकरणग्रन्थः। यस्य दर्शनस्य शास्त्रस्य वा विषयं संक्षिप्य

सूचयति सः ग्रन्थः प्रकरणग्रन्थः इत्युच्यते।

- मीमांसापरिभाषा मीमांसादर्शनस्य प्रकरणग्रन्थः।
- नव्यन्यायदर्शने वर्तमानः प्रकरणग्रन्थः भवति 'तर्कसंग्रहः', तर्कभाषा च।
- तर्कसंग्रहस्य कर्ता आसीत् अन्नंभट्टः। सप्तदशे शतके अन्नंभट्टः अजायत।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. नव्यन्यायदर्शनस्य प्रकरणग्रन्थौ कौ?
2. तर्कभाषतत्त्वबोधिनी इति ग्रन्थं केन विरचितम्?
3. चिन्तामण्यालोकसिद्धाञ्जनम् इति ग्रन्थस्य कर्ता कः. ?
4. अन्नंभट्टस्य पितुः नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. किम् नाम प्रकरणग्रन्थः?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. अन्नम्भट्टेन रचिताः ग्रन्थाः के?
2. प्रकरणग्रन्थस्य स्वभावः।

## निर्दिष्टाभ्यासाः(Assignments)

1. तर्कसंग्रहम् अधिकृत्य सामान्यज्ञानं विशदयत।
2. न्यायवैशेषिकदर्शनयोः साधर्म्यं वैधर्म्यं च लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. तर्कसंग्रहः,तर्कभाषा च।
2. अन्नंभट्टः
3. अन्नंभट्टः
4. विरुमलाचार्यः

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. Nyayasiddhanthamuktavali of Sri Viswanathapanchanana, Chaukhambha Sanskrit Sansthan, Varanasi, Rpt2011, Rs.250
2. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
3. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

BLOCK -2

# उद्देशप्रकरणम्

SGOU

# Unit -1
# मङ्गलवादः

## उद्देश्यानि(Learning Outcomes)

- तर्कसंग्रहस्य उद्देशं ज्ञास्यति।
- मङ्गलाचरणस्य आवश्यकताम् अवगन्तुं शक्ष्यति।
- मङ्गलाचरणे भारतीयपरम्परा कीदृशीति वेत्स्यति।
- तर्कसंग्रहस्य दीपिकायाः च मङ्गलाचरणश्लोकयोः अर्थमवगन्तुं शक्तः भविष्यति।

## प्राग्व्यपेक्षाः(pre requisites)

हे छात्राः,
प्रथमे खण्डे भारतीयदर्शनानां सामान्यपरिचयः अस्माभिः पठितः। इदानीं उद्देशप्रकरणं नाम द्वितीयं खण्डं प्रविश्यामः। युष्मभ्यं स्वागतम्। नाम्ना पदार्थसङ्कीर्तनम् उद्देशः। उद्देशः इति पदस्य स्पष्टीकरणम् इत्यर्थः। प्रथमं वयं केनचित्व्यक्तिना सह परिचायनार्थं नाम पृच्छेम। नाम ज्ञात्वैव सम्भाषणमारभते। शास्त्रेऽपि प्रथमं ज्ञानं, पुनः विशदीकरणं वर्तते। व्याकरणपठन-वेलायां प्रथमं संज्ञानां नामानि पठति। उद्देशेन लक्षणेन परीक्षया च सिद्धान्तनिर्णयः जायते।

## मुख्यविचाराः(keywords)

दीपिका, मीमांसकः, वैयाकरणः, टीका, मङ्गलाचरणम्, छात्राणां समाधानं (उत्तरपक्षम्), मङ्गलश्लोकः, श्रुतिः।

## Discussions

तर्कसंग्रहस्य कर्ता आसीत् अनंभट्टः। सप्तदशे शतके अन्नम्भट्टः अजायत। तस्य पिता विरुमलाचार्यः आसीत्। सः राघवसोमयाजिकुलोद्भवः आसीत्। सोऽयम् इदानीन्तने

आन्ध्रादेशे चित्तूर्प्रविश्यायां प्रादुर्भूतः। सः न केवलं तार्किकः किन्तु मीमांसकः वैयाकरणः च आसीत् ।

तर्कसंग्रहे सप्तपदार्थानां विशदीकरणेन साकं कारणस्य त्रैविध्यं प्रमाणलक्षणं, प्रमाणविशदीकरणम् च सविस्तरं प्रतिपादयति। कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये द्रव्यादिसप्तपदार्थानां संग्रहः एव तर्कसंग्रहे प्रतिपादयति। 'दीपिका' इति टीकापि अनेन रचिता। तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादि सप्तपदार्थाः तेषां संग्रहः- संक्षेपेण स्वरूपकथनं क्रियते इत्यर्थः तर्कसंग्रहः। बहुषु तर्कग्रन्थेषु सत्स्वपि शास्त्रग्रहणपटूनां छात्राणां अनायासेन तर्कशास्त्रप्रवेशनाय तर्कसंग्रहः प्रयोजकमेव। अतः जगन्नियन्तारं शिवं हृदये नितरां स्थापयित्वा विद्यागुरून्नमस्कृत्य तर्कसंग्रहरचनाम् अन्नम्भट्टः आरभते।

**तर्कसंग्रहस्य मङ्गलश्लोकमवतरति-**

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ।।१।।

| <u>अन्वयः</u> | | <u>अन्वयार्थः</u> |
|---|---|---|
| विश्वेशं हृदि निधाय | - | सर्वेश्वरं चेतसि ध्यात्वा |
| गुरुवन्दनं विधाय | - | आचार्यं नमस्कृत्य |
| बालानां सुखबोधाय | - | शास्त्रग्रहणपटूनां बालानां अनायासेन ज्ञानबोधाय |
| तर्कसंग्रहः क्रियते | - | तर्कसंग्रहः नाम ग्रन्थः विरच्यते। |

**सारः-** सर्वेश्वरं चेतसि ध्यात्वा आचार्यं वन्दयित्वा न्यायशास्त्राध्येतृणां छात्राणां प्रयासं विना शास्त्रतत्वानि अवगन्तुं तर्कसंग्रहः नामको ग्रन्थः मया (अन्नंभट्टेन)विरच्यते। अन्नंभट्टः तर्कसंग्रहं रचयति।

दीपिकायाः मङ्गलश्लोकमवतरति-

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ।।

| अन्वयः | -अन्वयार्थः |
|---|---|
| गिरां गुरुं | - सर्वविद्यानां आचार्यं |
| साम्बमूर्तिं विश्वेशरं | - अम्बया सहितं सशरीरं लोकपितरं |
| प्रणिपत्य | - नमस्कृत्य |
| शिशुहितां - | केवलं तर्कशास्त्रमात्रपठितानां बालानां हितं |
| (अनायासं पठितुं योग्यां) | |
| तर्कसंग्रहदीपिकां | - तर्कसंग्रहस्य अर्थप्रकाशस्य योग्यां दीपिकानामिकां |
| टीकां कुर्वे। | - टीकाग्रन्थं अहं रचयामि। |

**सारः-** सर्वविद्यानां उपदेष्टारं अम्बासहितं परमेश्वरं नमस्कृत्य बालानां हितयुक्तां, विना विलम्बं शास्त्रतत्वानि प्रतिपादयतः तर्कसंग्रहदीपिकां टीकां अहं (टीकाकारः अन्नंभट्टः) रचयामि।

**मङ्गलवादः।**

तर्कसंग्रहस्य तर्कसंग्रहदीपिकायाः च कर्ता उभयोः ग्रन्थयोः आदौ मङ्गलमाचरितवान्। चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानमस्कारपूर्वकं मङ्गलं ग्रन्थादौ आचरितवान्। समाप्तिमभिलषता ग्रन्थकारेण मङ्गलाचरणं कार्यम् इति वेदविधिः वर्तते। अतिप्राचीनकालादारब्धः अयं विधिः इदानीमप्यनुवर्तते। शिष्यशिक्षार्थं च मङ्गलाचरणं कार्यम्।

अत्र पूर्वपक्षः एवं सूचयति। मङ्गलेन समाप्तिं जनयितुं शक्यते वा? मङ्गलं समाप्तेः कारणं वा?यद्येव यत्र यत्र मङ्गलाचरणमस्ति तत्र तत्र समाप्तिः वर्तितव्या, मङ्गलाभावे समाप्त्यभावः च वर्तितव्यः। हि कारणसत्वे कार्यसत्वं, कारणाभावे कार्याभावश्च इति नियमात्। कारणसत्वे कार्याभावः चेत् अन्वयव्यभिचारः नाम दोषः। कारणं विना कार्योत्पत्तौ व्यतिरेकव्यभिचारश्च। कादम्बर्यादौ बाणभट्टेन ग्रन्थारम्भे मङ्गलमाचरितम्।

किन्तु समाप्तिः न दृष्टा। किरणावल्यादौ मङ्गलाभावेऽपि समाप्तिः दृश्यते। अतः मङ्गलं समाप्तिं प्रति न कारणम्।

अत्रेदं समाधानं (उत्तरपक्षम्)। एकस्य कार्यस्योत्पत्तौ अनेकानि कारणानि आवश्यकानि। विघ्नेनापि परिसमाप्तिः न जायते। अधिकानां विघ्नानां सद्भावात् कादम्बर्यां समाप्तिः न दृश्यते। किरणावल्यादौ ग्रन्थात् बहिरेव मङ्गलमाचरितम्। अतः नापि अन्वयव्यभिचारः, नापि व्यतिरेकव्यभिचारश्च।

मङ्गलस्य कर्तव्यत्वे शिष्टाचारानुमितिश्रुतेरेव प्रमाणम्। समाप्तिकामो मङ्गलमाचरेत् इति श्रुतिः। मङ्गलं वेदबोधितं कर्तव्यतायुक्तम् अलौकिकम् अविगीतम् (अनिन्दितम्) शिष्टाचारविषयः। दर्शादिवत्। भोजनादौ अतिव्याप्तिवारणाय अलौकिकः इति। रात्रिश्राद्धगदौ व्यभिचारवारणाय अविगीतमिति। रात्रिश्राद्धं नाविगीतम्। विगीतमित्यस्य निन्द्यमित्यर्थः। अलौकिकम् अविगीतं च आचारं शिष्टजनाः एव कुर्वन्ति। अत्र स्पष्टतायै एव शिष्टपदस्य प्रयोगः। न कुर्यात् निष्फलं कर्म इत्यत्र जलताडनस्य निष्फलत्वात् निषिद्धत्वम्।

तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः। तेषां संग्रहः तर्कसंग्रहः। बहुषु तर्कग्रन्थेषु सत्स्वपि शास्त्रग्रहणपटूनां छात्राणां अनायासेन तर्कशास्त्रप्रवेशनाय तर्कसंग्रहः प्रयोजकमेव। अतः जगन्नियन्तारं शिवं हृदये नितरां स्थापयित्वा विद्यागुरून् नमस्कृत्य तर्कसंग्रहरचनाम् अन्नंभट्टः आरभते।

**पुनरावृत्तिः(Recap)**

- तर्कसंग्रहस्य मङ्गलाचरणे श्लोके आचार्यं नमस्करोति।
- तर्कसंग्रहस्य तर्कसंग्रहदीपिकायाः च कर्ता उभयोः ग्रन्थयोः आदौ मङ्गलमाचरितवान्। मङ्गलम् वेदबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत्।
- चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानमस्कारपूर्वकं मङ्गलं ग्रन्थादौ आचरितवान्।

- यद्येव यत्र यत्र मङ्गलाचरणमस्ति तत्र तत्र समाप्तिः वर्तितव्या, मङ्गलाभावे समाप्त्यभावः च वर्तितव्यः।
- एकस्य कार्यस्योत्पत्तौ अनेकानि कारणानि आवश्यकानि।
- विघ्नेनापि परिसमाप्तिः न जायते।
- मङ्गलवादस्वरूपम् अवजानन्ति।

## वस्तुनिष्ठप्रश्नाः(Answer to Objective type questions)

1. किं नाम उद्देशः?
2. तर्कसंग्रहग्रन्थस्य उद्देशः कः?
3. तर्कसंग्रहदीपिकायाः कर्ता कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. मङ्गलस्य किं प्रयोजनम्।

## एकैकया खण्डिकयाउत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. तर्कसंग्रहस्य मङ्गलश्लोकं विशदयत।

## निर्दिष्टाभ्यासाः(Assignments)

1. मङ्गलाचरणस्य आवश्यकतां समर्थयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. पदार्थसङ्गीर्तनम् उद्देशः।
2. न्यायशास्त्राध्येतृणां छात्राणां प्रयासं विना शास्त्रतत्वानि अवगन्तुम्।
3. अन्नंभट्टः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. Nyayasiddhanthamuktavali of Sri Viswanathapanchanana, Chaukhambha Sanskrit Sansthan, Varanasi, Rpt2011, Rs.250
2. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
3. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit -2
# शास्त्रप्रवृत्तिः

## उद्देश्यानि (Learning Outcomes)

- न्यायशास्त्रस्य वादप्रक्रियां परिचिनोति।
- न्यायशास्त्रग्रन्थानां व्याख्यानशैलीम् अवगच्छति।
- दर्शनस्य प्राधान्यं जानाति।
- दर्शनविषयान् अवगच्छति।

## प्राग्व्यपेक्षाः (Pre requisites)

तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनम् उद्देशः। द्रव्य गुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव। द्रव्याणां नामानि जानन्ति।द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। पुनः पृथिव्यादीनां भेदाः लक्षणानि च प्रतिपादयन्ति।

## मुख्यपदानि (Key words)

शास्त्रप्रवृत्तिः, पदार्थसङ्गीर्तनं, उद्देशः, लक्षणं, परीक्षा, अवधारणं, पाकजगुणाः, अव्याप्तिः, अतिव्याप्तिः, असंभवः।

## Discussion

शास्त्रेषु प्रवेष्टुं योग्याप्रवृत्तिरेव शास्त्रप्रवृत्तिः। शास्त्रे प्रवेशनाय योग्यानि सोपानानि आवश्यकानि। तत्र भागत्रयं वर्तते। उद्देशः, लक्षणं, परीक्षा च। नाम्ना पदार्थसङ्कीर्त्तनमुद्देशः। लक्षणं नाम अवधारणं धर्मम् उपलक्षितो वा न वेति। प्रमाणैरवधारणं परीक्षा इति। लक्ष्यतावच्छेदः धर्मः लक्षणम्। परमतनिराकरणपूर्वकं

**स्वमतस्थापनं परीक्षा। उद्दिष्टस्य प्रविभक्तस्य यथालक्षणम् उपलक्षितो वा न वेति** प्रमाणैरवधारणं परीक्षा।

तर्कशास्त्रं एकं प्रसिद्धं शास्त्रमेव। किं नाम शास्त्रम्? शास्यते अनेन इति शास्त्रम्। हितशासनं शास्त्रम्। हितं धर्मं शास्ति इति शास्त्रम्। तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनं, द्रव्यगुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव। पृथिवी, आपः, तेजः, वायुः, इत्यादिः। पुनः पृथिव्यादीनां लक्षणानि। गन्धवती पृथिवी इत्यादिः। गुणविभजनं- गुणान् विभजतेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। पाकजगुणाः चत्वारः। रूपं, रसः, गन्धः, स्पर्शः च पाकजगुणाः। रूपादिवत् चतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्राऽ-पाकजं नित्यमनित्यं च। संख्यातः शब्दपर्यन्तेषु एकादश गुणाः सन्ति। लक्षणकथनावसरे अव्याप्तिः, अतिव्याप्तिः, असंभवः इति दोषाणाम् आविर्भावः न सम्भवेत्। लक्षणं तु अव्याप्तिः- अतिव्याप्तिः- असंभव रूपदोषत्रयशून्यत्वमेव।

लक्ष्ये लक्षणं युज्यते इति परीक्षणं कार्यम्। प्रमाणैरवधारणं परीक्षा। तर्कशास्त्रे चत्वारि प्रमाणानि। प्रत्यक्षम्, अनुमानम्, उपमानं,शब्दः च। प्रमाणैः परीक्ष्य सिद्धान्तमवतरति। सा रीतिः भवति तर्कशास्त्रस्य शास्त्रप्रवृत्तिः।

## पुनरावृत्तिः (Recap)

- शास्त्रेषु प्रवेष्टुं योग्याप्रवृत्तिरेव शास्त्रप्रवृत्तिः।
- तत्र भागत्रयं वर्तते। उद्देशः, लक्षणं, परीक्षा च।
- तर्कशास्त्रं एकं प्रसिद्धं शास्त्रमेव।
- तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनं, द्रव्यगुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. उद्देशं नाम किम्?
2. शास्त्रे प्रधानः त्रयः भागाः के?
3. दोषत्रयं किम्?
4. पाकजगुणाः के?
5. तर्कशास्त्रे कति प्रमाणानि ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. परीक्षा नाम किम् ?
2. शास्त्रे(लक्षणे) सम्भाव्यमानाः दोषाः के?

## एकैकया खण्डिकयाउत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. शास्त्रं नाम किम्? विशदयत।

## निर्दिष्टाभ्यासाः (Assignments)

1. शास्त्रप्रवृत्तिं विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. पदार्थसङ्कीर्त्तनमुद्देशः।
2. उद्देशः, लक्षणं, परीक्षा च।
3. अव्याप्तिः, अतिव्याप्तिः, असंभवः।

4. रूपं, रसः, गन्धः, स्पर्शः च।
5. चतुर्विधः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit -3
# पदार्थविज्ञानम्-सप्तपदार्थाः

## उद्देश्यानि(Learning Outcomes)

- पृथिव्यादि द्रव्यपदार्थानां सामान्यज्ञानम्।
- नवद्रव्याणां लक्षणं, भेदपुरस्सरं स्वरूपं च ज्ञायते।
- तमसः अतिरिक्त द्रव्यत्वं वा नवेति वेत्स्यति।
- पाकजगुणानां लक्षणानि भेदान् च अवगन्तुं शक्तः भवति।

## प्राग्व्यपेक्षाः(Pre requisites)

तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनम् उद्देशः। द्रव्यगुणकर्मसामान्य-विशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव। द्रव्याणां नामानि जानन्ति। द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। पुनः पृथिव्यादीनां भेदाः लक्षणानि च प्रतिपादयन्ति।

## मुख्यपदानि (Key words)

द्रव्याणि- अव्याप्तिः, अतिव्याप्तिः, असंभवः, चतुर्विंशति गुणाः, नित्यद्रव्यवृत्तयः।

## Discussion

**तर्कसंग्रहः** - **द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः।**

द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावः इति सप्त पदार्थाः।

**दीपिका-** पदार्थान् विभजते- द्रव्येति। पदस्यार्थः पदार्थः इति व्युत्पत्या अभिधेयत्वपदार्थसामान्यलक्षणम्। नन्वत्र विभावादेव सप्तत्वे सिद्धे सप्तपदग्रहणं व्यर्थमिति चेन्न, अधिकसंख्याव्यवच्छेदार्थकत्वात्।

अत्रेदं समाधानम्। अधिकसंख्याव्यवच्छेदात्वात् इति। पदार्थत्वं द्रव्यादिसप्तान्यतमत्व-व्याप्तम्। द्रव्यादिसप्तान्यतमत्वं द्रव्यादिभेदसप्तकाभावत्वमिति तदर्थत्वात्।

**तर्कसंग्रहः- तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।**

द्रव्याणि नव एव। तानि पृथिवी, आपः, तेजः, वायुः, आकाशं, कालः, दिक्, आत्मा, मनः च।

**दीपिका-** द्रव्यं विभजते। तत्र- द्रव्यादिमध्ये, द्रव्याणि नवैवेत्यन्वयः। कानि तानीत्यत आह-पृथिवीत्यादि।

तत्र पूर्वपक्षः एवमभिप्रैति- तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि? तथा हि 'नीलं तमः चलति' इति अबाधितप्रतीतिबलात् नीलरूपस्याधारतया क्रियाधारतया च तमसो द्रव्यत्वं तावत्सिद्धम्। (अबाधितप्रतीतिबलात् इत्यस्य अनुभवप्रतीतिः वर्तमानत्वात्)। नीलरूपत्वात् आकाशादिपञ्चके तमः नान्तर्भवति। अर्थात् आकाशे काले दिशि आत्मनि मनसि तमः नान्तर्भवति। अत एव वायौ स्पर्शाभावात्, सदागतिमत्वाभावाच्च। रूपरहितत्वे सति स्पर्शवत्वं वायोः लक्षणम्। अत्र तमसः रूपवत्वं स्पर्शाभावः च वर्तते। तेजसि तमः अन्तर्भवति। 'उष्णस्पर्शवत् तेजः' इति लक्षणम्। भास्वररूपाभावात् स्पर्शाभावाच्च तमः न तेजः। तमः जले न अन्तर्भवति। 'शीतस्पर्शवत्यापः' इति लक्षणम्। शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च तमः न जलम्। तमः पृथिव्यां नान्तर्भवति । 'गन्धवती पृथिवी' इति लक्षणम्। गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च तमः न पृथिवी। तस्मात्तमो दशमद्रव्यम् इति पूर्वपक्षः ।

अत्रेदं सिद्धान्तपक्षः। तमसः तेजोऽभावरूपत्वात्। तमो हि न रूपद्रव्यम् आलोकासहकृतचक्षुर्गाह्यत्वात्। प्रकाशस्य साहायं विना चक्षुरिन्द्रियेण ग्रहीतुं योग्यं भवति तमः। रूपिद्रव्यं द्रष्टुं तस्मिन् द्रव्ये प्रकाशस्पर्शमावश्यकमेव। अतः प्रौढप्रकाशकतेजः सामान्याभावः तमः। अपि च नीलं तमश्चलतीति प्रत्ययः भ्रमः। अतः नवद्रव्याणि ।

## लक्षणस्य लक्षणं किम् ?

द्रव्यजातिमत्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्। लक्षणे कदाचित् त्रयः दोषाः संभवेयुः । ते अव्याप्तिः, अतिव्याप्तिः, असंभवः च।

## अव्याप्तिः।

लक्ष्यैकदेशावृत्तित्वं अव्याप्तिः।

यथा- गोः कपिलत्वम् इत्यत्र गौः लक्ष्यम्। कपिलत्वं लक्षणम्। कपिलवर्णत्वं सर्वेषु गोषु न वर्तते इत्यतः कपिलत्वम् इति लक्षणे अव्याप्तिः ।

## अतिव्याप्तिः।

अलक्ष्यवृत्तित्वमतिव्याप्तिः ।

यथा- गोः शृङ्गित्वम्। लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमतिव्याप्तिः। शृङ्गित्वमिति लक्षणं गवि वर्तते, अलक्ष्ये महिषादिष्वपि वर्तते। अतः अतिव्याप्तिः नाम दोषः।

## असंभवः।

लक्ष्यमात्रावर्तनमसंभवः ।

यथा- गोरेकशफवत्वम्। अत्र मात्र इति पदं कृत्स्नमित्यर्थे प्रयुक्तम्। एकशफवत्वं गोः लक्षणमित्युच्यते चेत् इदं लक्षणं लक्ष्ये गवि कदापि न संभवति। अतः असंभवः ।

अतः किं लक्षणमित्युच्यते चेत् अव्याप्त्यतिव्याप्त्यसंभवरूपत्रयरहितः धर्मः लक्षणम् ।

यथा- गोः सास्नादिमत्वम् । सर्वेषु गोषु सास्नादिमत्वमस्ति। गोभिन्नेषु सास्नादिमत्वं नास्ति च।

असाधारणो धर्मः लक्षणम्। लक्ष्यतावच्छेदकसमनियतत्वम् असाधारणत्वम्। सास्नावत्वं गोत्वं च गोषु एवं दृश्यते। सास्नावत्वं लक्ष्यतावच्छेदकस्य गोत्वस्य समनियतत्वात् असाधारणधर्ममेव ।

व्यावर्तकमेव लक्षणमिति केचन। लक्ष्यम् अलक्ष्येभ्यः भिन्नम्। व्यावृत्तिः इतरभेदः। व्यावर्तकं व्यवहारप्रयोजनं च लक्षणमिति अपरे केचन। व्यावर्तकमेव लक्षणमित्युच्यते चेत् व्यावृत्तौ अभिधेयत्वादौ अतिव्याप्तिवारणाय तद्भिन्नत्वे सति लक्ष्यतावच्छेदकसमनियतत्वं लक्षणमिति वक्तव्यम्।

पूर्वपक्षः-गुणवत्वं द्रव्यस्य सामान्यलक्षणम्। गुणवत्वं इति लक्षणं द्रव्ये इव गुणेऽपि स्यात्। एकं रूपं रसात्पृथगिति व्यवहारात् रूपादै अतिव्याप्तिः।

गुणे गुणानङ्गीकारात् पूर्वपक्षेण सूचितः दोषः न।

## गुणविभजनम्।

**तर्कसंग्रहः- रूपरसगन्धस्पर्श सांख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व स्नेहशब्दबुद्धिसुखदुखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारश्चतुर्विंशतिः गुणाः।**

चतुर्विंशतिः गुणाः। ते रूपं रसः गन्धः, स्पार्शः, संख्या, परिमाणं, पृथक्त्वं संयोगः, विभागः, परत्वम्, अपरत्वं, गुरुत्वं द्रवत्वं, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, देषः प्रयत्नः, धर्मः, अधर्मः च भवन्ति ।

**दीपिका-** गुणं विभजते रूपेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान् गुणः।

**पूर्वपक्षः-** लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशति गुणाः इति। **समाधानपक्षः-** गुरुत्वाभावरूपं लघुत्वम्। अवयवसंयोगविशेषत्वात् मृदुत्वं कठिनत्वं च सिध्यति ।

## कर्मविभजनम् ।

**तर्कसंग्रहः- उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि।** कर्माणि पञ्च। तानि उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनं, प्रसारणं, गमनं च।

**दीपिका-** कर्म विभजते- उत्क्षेपणेति। संयोगभिन्नत्वे सति संयोगसमवायिकारणं कर्म। कर्मत्वजातिमत् कर्म।

**पूर्वपक्षः-** भ्रमणम् इति अतिरिक्तस्य कर्मणः सत्त्वात् कथं पञ्च कर्माणि इति।

**समाधानपक्षः-** भ्रमणादीनामपि गमने अन्तर्भावः । अतः पञ्च कर्माणि ।

## सामान्यविभजनम् ।

**तर्कसंग्रहः- परमपरं चेति द्विविधं सामान्यम्। परम् अपरं चेति सामान्यं द्विविधम् ।**

**दीपिका -** सामान्यं विभजते परमिति । परमधिकदेशवृत्ति। अपरं न्यूनदेशवृत्ति। द्रव्यगुणक सामान्यं वर्तते। एषु त्रयेऽपि वर्तमानं सामान्यं परम्। सामान्यादिचतुष्टये जातिः नास्ति। अर्थात् सामान्ये, विशेषे, समवाये, अभावे च जातिः न वर्तते। अनुगतप्रतीतिविषयः धर्मः जातिः।

## विशेषः

**तर्कसंग्रहः- नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।**

**दीपिका -** विशेषं विभजते- नित्येति। पृथिव्यादिचतुष्टयस्य परमाणवः, आकाशादिपञ्चकं च नित्यद्रव्याणि।

## समवायः ।

तर्कसंग्रहः- समवायस्त्वेक एव।

**दीपिका** -समवायस्य भेदो नास्तीत्याह- समवायसमत्विति।

## अभावविभजनम् ।

**तर्कसंग्रहः- अभावः चतुर्विधः। प्रागभावप्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति** । अभावः चतुर्विधः। प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः चेति।

अनादिः सान्तः प्रागभावः, उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसः, उत्पत्यनन्तरं कार्यस्य।

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। नित्यः संसर्गाभावः अत्यन्ताभावः। त्रैकालिकः इत्यस्य नित्यमित्यर्थः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताको अन्योन्याभावः। यथा- घटः पटो न।

**दीपिका-** अभावं विभजते। अभाव इति।

## पुनरावृत्तिः(Recap)

- द्रव्याणि नव । पृथिवी, आपः, तेजः, वायुः, आकाशं कालः, दिक्, आत्मा, मनः च।
- पदार्थविभजनं सप्त पदार्थाः ।
- द्रव्यत्वजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम् ।
- लक्षणे अव्याप्तिः, अतिव्याप्तिः, असंभवः इति दोषाः कदाचित् भवेयुः ।
- लक्ष्यैकदेशवृत्तित्वम् अव्याप्तिः ।
- अलक्ष्यवृत्तित्वम् अतिव्याप्तिः ।
- लक्ष्यमात्रावर्तनम् असंभवः ।
- असाधारणः धर्मः लक्षणम्।
- चतुर्विंशतिः गुणाः ।
- उत्क्षेपणा-ऽपक्षेपणाऽऽ-कुञ्चन-प्रसारण गमनानि पञ्च कर्माणि ।
- परं अपरं चेति सामान्यं द्विविधम् ।
- समवायः एकः एव।
- अभावश्चतुर्विधः- प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावो- ऽन्योन्याभावश्चेति।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. तर्कसंग्रहे कति पदार्थाः सन्ति ?
2. द्रव्यसामान्यलक्षणं किम् ?
3. कति द्रव्याणि सन्ति ?
4. कति गुणाः सन्ति?
5. कति कर्माणि सन्ति?
6. सामान्यं कति विधम् ?कानि च तानि ?
7. कियन्तो विशेषाः?
8. समवायः कति विधः?
9. अभावः कति विधः?
10. लक्ष्यैकदेशावृत्तित्त्वं किम् ?
11. लक्षणे कति दोषाः ? ते के ?
12. असाधारणो धर्मः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. द्रव्याणि कति? कानि च तानि?
2. कति गुणाः ? ते के?
3. अभावः कति विधः ? ते के?

4. कति कर्माणि ?कानि च तानि?
5. प्रागभावस्य लक्षणं किम् ?
6. द्रव्यसामान्यलक्षणं किम् ?

**एकैकया खण्डिकयाउत्तराणि लिखत।**
**(Answer the following questions in a paragraph)**

1. नैयायिकमते दोषत्रयं विशदयत ।
2. तर्कसंग्रहे प्रतिपादितं पदार्थाः विशदयत ।

**निर्दिष्टाभ्यासाः(Assignments)**

1. तर्कसंग्रहे प्रतिपादितं द्रव्याणि विशदयत ।
2. तर्कसंग्रहे प्रतिपादितं गुणाः विशदयत ।

**वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)**

1. सप्त ।
2. असाधारणधर्मः ।
3. नव ।
4. चतुर्विंशतिः ।
5. पञ्च।
6. द्वे,परम् अपरम्।
7. नित्यद्रव्यवृत्तयोः विशेषस्त्वनन्ता एव ।
8. समवायस्तु एक एव ।
9. चतुर्विधः ।

10. अन्नम्भट्टः ।

11. अव्याप्तिः ।

12. त्रयः। अव्याप्ति,अतिव्याप्ति,असंभवः।

13. दोषत्रयरहितः धर्मः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर, ए षोर्ट् हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८
3. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit -4
# शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वखण्डनम्

## उद्देश्यानि (Learning Outcomes)

- पदार्थभेदान् अवगच्छन्ति। ।
- तर्कशास्त्रग्रन्थस्य परिचयः।
- तत्वशास्त्रे युक्तिविचारं निरूपयति
- शक्तिसादृश्ययोः अतिरिक्तपदार्थखण्डनं जानाति।

## प्राग्व्यपेक्षाः(Prerequisites)

उद्देशप्रकरणे द्रव्यादि सप्तपदार्थानां संग्रहः एव तर्कसंग्रहे प्रतिपादयति । नव द्रव्याणि। पृथिवी, आपः, तेजः, वायुः, आकाशं, कालः, दिक्, आत्मा, मनः च। तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्गीर्तनम् उद्देशः। द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। शक्तिः सादृश्यं च अतिरिक्तपदार्थ मेवेति पूर्वपक्षः। तस्य खण्डमत्र विशदयति।

## मुख्यपदानि(Keywords)

पदार्थः, सादृश्यमप्यतिरिक्तः, दाहत्वावच्छिन्नं, चन्द्रसदृशं, दाहः, उत्तेजकम्।

## Discussion

**शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वम् आशङ्कते।**

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः इत्युक्तम्। प्राभाकरमते शक्तेः अतिरिक्तपदार्थत्वात् आलङ्कारिकमते सादृश्यस्यातिरिक्तपदार्थत्वात् कथं सप्तपदार्थाः इति।

कायजननसामर्थ्यं शक्तिः। तथा हि, मण्यादिसमवहितेन वह्निना दाहो न जन्यते। तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिः नश्यते। उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते।

एवं सादृश्यमप्यतिरिक्तः पदार्थः। तद् हि षट्सु भावेषु अन्तर्भवति। सामान्येऽपि सत्वात्।

यथा- गोत्वं नित्यं तथा अश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः। अभावे सादृश्यं नान्तर्भवति । सत्वेन प्रतीयमानत्वात् ।

## शक्तेः अतिरिक्तपदार्थत्वनिराकरणम् ।

अत्रेदं समाधानम्। अतिरिक्तशक्तिकल्पनां नाश्यनाशकभावकल्पनां चापेक्ष्य लाघवात् दाहत्वावच्छिन्नं प्रति मण्यभावविशिष्टवह्नित्वादिनैव हेतुताकल्पनमुचितम्। (दाहादिकं प्रति मण्यभावादेः हेतुत्वम्।) उत्तेजके सति प्रतिबन्धकसद्भावेऽपि दाहः जायते। उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात्। अतः शक्तिः न पदार्थन्तरम्।

## सादृश्यस्य अतिरिक्तपदार्थत्वनिराकरणम् ।

सादृश्यं न पदार्थान्तरम्। सादृश्यं नाम, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। चन्द्रसदृशं मुखम् इत्यत्र चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्वं मुखम् इत्यर्थः। अतः सादृश्यं न पदार्थान्तरम् ।

उद्देशप्रकरणं समाप्तम्। अस्य भागस्य प्रधानांशाः अधो दीयन्ते ।

## पुनरावृत्तिः(Recap)

- मण्यादिसमवहितेन वह्निना दाहो न जन्यते।
- तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिः नश्यते।
- उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते।

- एवं सादृश्यमप्यतिरिक्तः पदार्थः।
- सादृश्यं नाम, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. किम् नाम सादृश्यम् ?
2. का नाम शक्तिः

## एकैकया खण्डिकयाउत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. शक्तेः अतिरिक्तपदार्थत्वनिराकरणम् ।
2. सादृश्यम् अतिरिक्तपदार्थं वा न वा इति साधयत ।

## निर्दिष्टाभ्यासाः(Assignments)

1. शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वम् आशङ्क्य निराकुरुत ।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.

## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.


SGOU

BLOCK -3

# द्रव्याणि गुणाश्च

SGOU

# Unit -1
# नवद्रव्याणां लक्षणं विभागश्च

## उद्देश्यानि (Learning Outcomes)

अस्य पाठभागस्य अध्ययनेन भवान्

- नवद्रव्याणां लक्षणानि विभागान् च ज्ञास्यति।
- सृष्टिप्रलयलक्षणम् अवगन्तुं शक्यति।
- तमसः अतिरिक्तद्रव्यत्वं वा नवेति वेत्स्यति ।
- पाकजगुणानां लक्षणानि भेदान् च अवगन्तुं शक्तः भविष्यति।
- संयोगविभागयोः परत्वापरत्त्वयोः च भेदमवगन्तुं शक्यति।

## प्राग्व्यपेक्षाः (Pre requisites)

भोः छात्राः,

अस्य पत्रस्य प्रथमे खण्डे भारतीयदर्शनानां सामान्यपरिचयः, द्वितीये खण्डे उद्देशप्रकरणः च अस्माभिः पठितौ। तृतीये खण्डे द्रव्याणि गुणाश्च इति भागं पठनाय यत्नः कार्यः। तृतीयखण्डं प्रति स्वागतम् । अस्मिन् भागे द्रव्याणां विभागान् पठामः।

## मुख्यपदानि (Key words)

गन्धवती, शीतस्पर्शवत्वम्, उष्णस्पर्शवत्, रूपरहितत्वम्, ईश्वरचिकीर्षा, द्व्यणुकः, त्र्यणुकः, चतुरणुकः, सृष्टिः, प्रलयः, शब्दगुणकम्, अतीतादिव्यवहारहेतुः, प्राच्यादिः, ज्ञानाधिकरणम्, सुखाद्युपलब्धिः, तमः, प्रौढप्रकाशकतेजोऽभावः, पाकजगुणाः, चक्षुर्मात्रग्राह्यः, केषाञ्चन गुणानां, व्याप्यवृत्तित्वम्, अव्याप्यवृत्तित्वम्, रसनाग्राह्यः, घ्राणग्राह्यः, त्वगिन्द्रियमात्रग्राह्यः, पीलुपाकः, पिठरभागः, एकत्वादिव्यवहारहेतुः,

मानव्यवहारः, पृथग्व्यवहारः, संयुक्तव्यवहारः, संयोगनाशकः, परत्वव्यवहारः, अपरत्वव्यवहारः, आद्यस्यन्दनासमवायिकारणम्, आद्यपतनासमवायिकारणम्, श्रोत्रग्राह्यः, ध्वन्यात्मकः, वर्णात्मकः, वीचीतरङ्गन्यायः, कदम्बमुकुलन्यायः ।

## Discussion

### नवद्रव्याणां लक्षणं विभागश्च ।

### पृथिव्याः लक्षणं विशदयति।

**तर्कसंग्रहः- तत्र गन्धवती पृथिवी। सा द्विविधा नित्या, अनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

**व्याख्या-** सप्तसु पदार्थेषु प्रथमः पदार्थः भवति पृथिवी। गन्धवती पृथिवी। गन्धवत्वं पृथिव्याः लक्षणम्। नित्या अनित्या चेति पृथिवी द्विधा। परमाणुस्वरूपा पृथिवी नित्या पृथिवी। कार्यरूपा पृथिवी अनित्या पृथिवी।

अनित्या पृथिवी पुनः त्रिविधा। शरीरेन्द्रियविषयभेदात्। अस्माकं शरीरं पार्थिवशरीरस्य उदाहरणमेव। गन्धग्राहकं नासाग्रवति घ्राणं पार्थिवेन्द्रियम्। मृत्-पाषाणादयः पार्थिवविषयस्य उदाहरणानि भवन्ति ।

**दीपिका-** तत्रोद्देशक्रमानुसारेण पृथिव्याः लक्षणमाह- गन्धवतीति। नाम्ना पदार्थसङ्कीर्तनमुद्देशः। उद्देशक्रमे च सर्वत्र इच्छैव नियमिका। ननु सुरभ्यसुरभ्यवयावारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादादव्याप्तिः। न च तत्र गन्धप्रतीत्यनुपपत्तिः इति वाच्यम्। अवयवगन्धस्यैव तत्र भानसम्भवेन चित्रगन्धानङ्गीकारात्। किं च उत्पन्नविनष्ट- घटादावव्याप्तिरिति चेन्न, गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्यैव विवक्षितत्वात्। ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न, अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र संयुक्तसमवायेन

भानाङ्गीकारात्। ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां काले अतिव्याप्तिरिति चेन्न, सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेन लक्षणस्याभिमतत्वात् ।

**व्याख्या -** उद्देशक्रमानुसारं प्रथमं पृथिव्याः लक्षणं सूचयति- गन्धवती पृथिवी इति। पदार्थानां नामनिर्देशः उद्देशः। उद्देशक्रमे सर्वत्रैवेच्छा नियामिका।

अत्र पूर्वपक्षी एवं वदति यत् सुगन्धसहितेन अवयवेन दुर्गन्धसहितेन अवयवेन च सहिते कस्मिंश्चित् द्रव्ये परस्परविरोधात् गन्धः न। अतः अत्र अव्याप्तिः। तत्र गन्धप्रतीत्यनुपपत्तिरिति न च वाच्यम्।

अत्रेदं समाधानम्- इयं गन्धवती इति प्रतीतिविषये अवयवगन्धमेव। इदं शास्त्रं चित्रगन्धं नाङ्गीकरोति ।

**पूर्वपक्षी-** उत्पन्नविनष्टघटे आद्यक्षणे वर्तमाने पार्थिवद्रव्ये गन्धाभावात् अव्याप्तिः वर्तते।

**सिद्धान्तपक्षी-** गन्धस्य समानाधिकरणं भवति द्रव्यत्वस्य अपरजातिरूपं पृथिवीत्वम्। आद्यपक्षे पृथिव्यां गन्धः नास्त्यपि पृथिवीत्वमस्ति। एतत् पृथिवीत्वं गन्धस्थले वर्तते। अतः नाव्याप्तिः।

**पूर्वपक्षी-** सुगन्धे जलेऽपि गन्धप्रतीतेः अतिव्याप्तिः ।

**सिद्धान्तपक्षी -** पार्थिवद्रव्यस्य संयोगेनैव जले गन्धत्वमायाति। शुद्धे जले न गन्धः। गन्धं पृथिव्यामेव।

**पूर्वपक्षी-** कालस्य सर्वाधारतया सर्वेषां लक्षणानां काले अतिव्याप्तिः ।

**सिद्धान्तपक्षी -** कालिकसम्बन्धभिन्नसम्बन्धेन गन्धवत्वं पृथिव्याः लक्षणम् इत्यतः नातिव्याप्तिः।

**दीपिका-** पृथिवीं विभजते- सा द्विविधेति। नित्यत्वं ध्वंसाप्रतियोगित्वम्। अनित्यत्वं

ध्वंसप्रतियोगित्वम्। प्रकारान्तरेण विभजते- पुनरिति। आत्मनो भोगायतनं शरीरम्। यदवच्छिन्नात्मनि भोगो जायते, तद् भोगायतनम्। सुखदुःखसाक्षात्कारो भोगः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वम्। शरीरेन्द्रियभिन्नो विषयः। एवञ्च गन्धशरीरं पार्थिवशरीरम्। गन्धवदिन्द्रियं पार्थिवेन्द्रियम्। गन्धवान् विषयः पार्थिवविषयः इति तल्लक्षणं बोध्यम्। पार्थिवशरीरं दर्शयति- शरीरमिति । पार्थिवेन्द्रियं दर्शयति- इन्द्रियमिति। गन्धग्राहकमिति प्रयोजनकथनम्। घ्राणमिति संज्ञा। नासाग्रवर्तीत्याश्रयोक्तिः। एवमुत्तरपि ज्ञेयम्। पार्थिवविषयं दर्शयति- विषय इति।

**व्याख्या-** नित्यं नाशरहितः (ध्वंसस्य अप्रतियोगि) आत्मनः भोगस्य यद् अधिकरणं तत् शरीरम्। शब्दं विना उद्भूतविशेषगुणानां अनाश्रयरूपेण वर्तमानस्य ज्ञानकारणभूतस्य मनःसंयोगस्य आश्रयभूतम् इन्द्रियम्।

पार्थिवशरीरम् अस्माकं शरीरमेव। घ्राणः घ्राणेन्द्रियः ।

## अपां लक्षणं विशदयति।

**तर्कसंग्रहः- शीतस्पर्शवत्यापः। ताः द्विविधाः- नित्या अनित्याश्च । नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः- शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोकम्। इन्द्रियं रसग्राहकं रसनं, जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।**

**व्याख्या -** शीतत्वे सति स्पर्शवत्वम् अपां लक्षणम्। नित्यं परमाणुरूपम्। द्व्यणुकादयः अनित्याः ।

**दीपिका-** अपां लक्षणमाह- शीतेति। उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्श समानाधिकरणद्रव्यत्वापरजातिमत्वं विवक्षितम्। शीतं शिलातलम् इत्यादौ जलसम्बन्धादेव शीतस्पर्शभानमिति नातिव्याप्तिः। अन्यत्सर्वं पूर्वरीत्या व्याख्येयम्।

## तेजसः लक्षणं विशदयति ।

**तर्कसंग्रहः- उष्णस्पर्शवत्तेजः। तच्च द्विविधम्- नित्यम् अनित्यं च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधो- भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिमाणहेतुरुदर्यम्। आकरजं सुवर्णादि।**

**व्याख्या-** उष्णत्वे सति स्पर्शवत्वं तेजसः लक्षणम्। अनित्यं तेजः त्रिधा- शरीरेन्द्रियविषयभेदात्। तेजसः शरीरम् आदित्यलोके प्रसिद्धम्। तेजसः विषयः चतुर्विधः। भौमं, दिव्यम्, उदर्यम्, आकरजं चेति। वह्न्यादिकं भौमम्। अबिन्धनं यस्य तत् अबिन्धनम्। अबिन्धनं विद्युत् दिव्यम् । भुक्तस्य परिणामहेतुभूतं तेजः उदर्यम्। सुवर्णादि आकरजम्। **दीपिका-** तेजसो लक्षणमाह उष्णेति। उष्णं जलम् इति प्रतीतेः तेजः सम्बन्धानुविधायित्वात् नातिव्याप्तिः। विषयं विभजते भौमेति ।

**व्याख्या-** उष्णं जलम् इत्यत्र अतिव्याप्तिः न। जले तेजः संयोगादेव उष्णत्वमायाति। जले उष्णत्वं न। उष्णस्पर्शवत्वं तेजसि वर्तते।

अनित्यरूपं तेजः चतुर्धा विभक्तमस्ति। भौमं, दिव्यम्, उदर्यम्, अकारजमिति।

## वायुं निरूपयति ।

**तर्कसंग्रहः- रूपरहितस्पर्शवान् वायुः। सः द्विविधः नित्योऽनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः । शरीरान्तः सञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते ।**

**व्याख्या-** रूपरहितत्वे सति स्पर्शवत्वं वायोः लक्षणम्। सः द्विविधः नित्यः अनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनः शरीरेन्द्रियविषयभेदात् त्रिविधः। वायुलोके

वर्तमानं शरीरं वायवीयमेव। शरीरान्तःसञ्चारी वायुः प्राणः। स एकः किन्तु उपाधिभेदात् प्राणापानोदानव्यानसमानसंज्ञां लभते। (अत्र प्राणः मूर्धगः। अपानः पक्वाधानालयः। उरः स्थानमुदानस्य। व्यानः हृदि स्थितः। समान अग्निसमीपस्थः कोष्ठे चरति सर्वतः इति अष्टाङ्गहृदये सूत्रस्थाने)।

प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदात् अपादानादिसंज्ञां लभते इति प्रशस्तपादभाष्यम्।

**दीपिका-** वायुं लक्षयति रूपेति। आकाशादौ अतिव्याप्तिवारणाय स्पर्शवान् इति। पृथिव्यादौ अतिव्याप्तिवारणाय रूपरहितेति ।

वायुलक्षणे स्पर्शवान् इति पदस्याभावे आकाशादौ अतिव्याप्तिः। तन्निवारणाय स्पर्शवान् इति पदम् ।

केवलं स्पर्शवान् वायुः इत्युच्यते चेत् स्पर्शनेनापि पृथिवीं ज्ञातुं शक्यते इत्यतः पृथिव्यादौ अतिव्याप्तिः । तन्निवारणाय रूपरहितेति पदम् ।

प्राणस्य कुत्र अन्तर्भावः इत्युच्यते चेत् शरीरान्तःसञ्चारी वायुः प्राण इति। स च एको प्राणः स्थानभेदात् प्राणापानादिशब्दैः व्यवह्रियते इत्यर्थः।

स्पर्शानुमेयः वायुः। वायोः चलने यः अनुष्णाशीतस्पर्शः अनुभववेद्यः भवति सः स्पर्शः कस्मिंश्चित् द्रव्ये स्थितं स्यात्, गुणत्वात् रूपवत्। अस्य न पृथिव्याश्रयः। पृथिव्यां प्रत्यक्षप्रायः स्पर्शमात्रः न भवेत्। न जलतेजसी, अनुष्णाशीतस्पर्शत्वात्। न विभुचतुष्टयं सर्वत्रोपलब्धिप्रसङ्गात्। न मनः, परमाणुस्पर्शस्यातीन्द्रियत्वात्। तस्मात् यः प्रतीयमानः स्पर्शाश्रयः सः वायुः।

अत्र पूर्वपक्षि एवं पृच्छेत्- वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्, घटवत् इति।

**सिद्धान्तपक्षी-** अत्र उद्भूतरूपवत्वम् उपाधिरेव। यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षात्वं तत्रोद्भूतरूपवत्वमिति घटादौ साध्यव्यापकत्वम्। प्रत्यक्षस्पर्शाश्रयत्वं यत्रास्ति तत्र

उद्भूतरूपवत्वं वर्तितव्यम्। किन्तु अत्र न दृश्यते इत्यतः साध्यव्यापकत्वम्। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः नाम हेत्वाभासः । तस्मात् रूपरहितत्वात् वायुरप्रत्यक्षः । वायोः अस्तित्वं स्थापयितुं अनुमानमेव प्रमाणमिति वैशेषिकाः। तेषां मतानुसारं वायुं त्वगिन्द्रियेण ज्ञातुं न शक्यते। वायौ वर्तमानं स्पर्शनात्मकं गुणमेव त्वगिन्द्रियेण ज्ञायते। स्पर्शः कश्चन गुणः इत्यतः तस्य गुणस्याश्रयभूतं द्रव्यं वायुं अनुमानप्रमाणेन सिद्ध्यति ।

नैयायिकास्तु न केवलं वायौ वर्तमानः स्पर्शः वायुरपि प्रत्यक्षम् इति वदन्ति। वायवीयं स्पर्शमिव वायुमपि त्वगिन्द्रियेण ज्ञातुं शक्यते इत्यतः वायोः सद्भावे प्रत्यक्षं प्रमाणमिति ते वदन्ति।

## सृष्टिप्रलयनिरूपणम्।

**दीपिका-** इदानीं कार्यरूपस्य पृथिव्यादिचतुष्टयस्य (पृथिवी, जलं, तेजः, वायुः) उत्पत्तिविनाशक्रमं विशदयति। ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते। (कर्तुम् इच्छा चिकीर्षा। अत्र सृष्टुमिच्छा)। ततः परमाणुद्वयसंयोगे सति द्व्यणुकम् उत्पद्यते। ततः त्रिभिः द्व्यणुकैः त्र्यणुकम्। चतुरणुकादिक्रमेण महती पृथिवी, महत्य आपो, महत्तेजो, महान् वायुरुत्पद्यते। एवम् उत्पन्नस्य संजिहीर्षावशात् (संहर्तुम् इच्छावशात्) परमाणुषु क्रिया। क्रियया परमाणुद्वयविभागे द्व्यणुकनाशः, ततः त्र्यणुकनाशः, ततः चतुरणुकस्य नाशः इत्येवं पृथिव्यादिनाशः ।

असमवायिकारणात् द्व्यणुकनाशः समवायिकारणनाशात् त्र्यणुकनाशः इति सम्प्रदायः। (प्रीचीनमतम्)।

सर्वत्र असमवायिकारणनाशात् कार्यद्रव्यनाशः इति नवीनाः। किं पुनः परमाणुसद्भावे प्रमाणम्? **उच्यते-** जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रज उपलभ्यते तत्सावयवम्, चाक्षुषद्रव्यत्वात्, पटवत्। त्र्यणुकावयवोऽपि सावयवः महदारम्भकत्वात्,

तन्तुवत्। महदारम्भकत्वात् इत्यस्य बृहतः जनकत्वात्। यो द्व्यणुकावयवः सः परमाणुः, स च नित्यः। तस्यापि कार्यत्वे अनवस्थाप्रसङ्गात्। अनवस्था नाम दोषः। कुत्र परिसमाप्तव्यम् इति निर्णेतुम् असाध्या स्थितिः अनवस्था। तथा च मेरुसर्षपयोः (सुमेरुपर्वतस्य अतिलघोः सर्षपस्य च) समानपरिमाणत्वापत्तिः। ( सर्षपः नाम कटुकुमणि इति कैरल्याम्।)

**सृष्टिप्रलयसद्भावे किं प्रमाणम्?धाता यथापूर्वमकल्पयत् इत्यादिश्रुतिरेव प्रमाणम्।**

सर्वकार्यद्रव्याणां नाशमेव अवान्तरप्रलयः। सर्वभावकार्यध्वंसो महाप्रलयः इति विवेकः। वेदः ईश्वरप्रोक्तम् इति न्याय-वैशेषिकाः। वेदे धाता यथापूर्वमकल्पयत् इति श्रुतिरस्ति। बहवः कल्पाः। प्रतिकल्पं प्रलयः। प्रलयानन्तरं सृष्टिः । पूर्वकल्पवत् सृष्टिः । ईश्वरप्रोक्तत्वात् वेदस्य प्रामाण्यम्। वेदे सृष्टिप्रलयसूचना न्याय-वैशेषिकदर्शनं सृष्टिप्रलयमङ्गीकरोति।

## आकाशं लक्षयति ।

**तर्कसंग्रहः- शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।**

**दीपिका-** आकाशं लक्षयति- शब्देति। शब्दः इति गुणेन सहितम् आकाशम्। आकाशमपि पृथिव्यादिवत् नानेकानि। आकाशम् एकमिति। भेदे प्रमाणाभावात्। एकत्वादेव सर्वत्र शब्दोपलब्धेः विभुत्वमङ्गीकर्तव्यम्। आकाशं विभु एव। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं परिच्छिन्नपरमाणुत्वं क्रियावत्वं वा। विभुत्वादेव आत्मवत् नित्यं च।

## कालं लक्षयति ।

**तर्कसंग्रहः- अतीतादिव्यवहारहेतुः कालः। स चैको विभुः नित्यश्च।**

**व्याख्या-** अतीतादिव्यवहारस्य यो असाधारणहेतुः सः कालः। कालः सर्वस्यापि आधारः, निमित्तकारणश्च।

**दीपिका-** कालं लक्षयति- अतीतेति। सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च।

## दिशो लक्षणं सूचयति ।

**तर्कसंग्रहः- प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।**

**व्याख्या-** प्राच्यादिव्यवहारस्य यः असाधारणहेतुः सा दिक्।

**दीपिका-** दिशो लक्षणमाह- प्राचीति। दिगपि कार्यमात्रे निमित्तकारणम् ।

**आत्मनः लक्षणं विशदयति ।**

**तर्कसंग्रहः- ज्ञानाधिकरणमात्मा। सः द्विविधः- जीवात्मा, परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुः नित्यश्च।**

**दीपिका-** आत्मनो लक्षणमाह- ज्ञानेति। आत्मानं विभजते- स द्विविध इति। परमात्मनो लक्षणमाह- तत्रेति । नित्यज्ञानाधिकरणत्वम् ईश्वरत्वम् ।

अत्र पूर्वपक्षी एवं पृच्छति। ईश्वरस्य सद्भावे किं प्रमाणम् ? न तावत्प्रत्यक्षम्। यदि प्रत्यक्षं किं तत् बाह्यप्रत्यक्षम्? उत आभ्यन्तरप्रत्यक्षम्? अरूपित्वात् नाद्यम्। आत्मसुखादिव्यतिरिक्तत्वात् नान्त्यम्। हेत्वभावात् नानुमानप्रमाणम्। तथाविधिगमाभावात् नागमः ।

अत्रेदं समाधानम्। ईश्वरस्य सद्भावे अनुमानं प्रमाणम्। तदर्थं हेतु अस्ति। क्षित्यङ्गुरादिकं कर्तृजन्यं कार्यत्वात्, घटवत् इत्यनुमानस्य प्रमाणत्वात्। उपादानविषयक प्रत्यक्षं, तज्जनयितुमाग्रहः, तदर्थं यत्नवान् व्यक्तिः कर्ता। उपादानं नाम समवायिकरणम्। सर्वान् सूक्ष्मपदार्थानपि द्रष्टुं निपुणः सर्वज्ञः । यः सर्वज्ञः सर्ववित् इति वेदवाक्यमपि ईश्वरस्य सद्भावे प्रमाणम्।

जीवस्य लक्षणमाह- जीवेति। सुखाद्याश्रयत्वं जीवलक्षणम्। मनुष्योऽहम् इत्यादौ अहंप्रत्यये शरीरस्यैव विषयत्वात् शरीरमेव आत्मेति आशङ्का। शरीरस्यात्मत्वे करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात्। इन्द्रियाणामपि आत्मत्वं न। इन्द्रियाणामात्मत्वकल्पने योऽहं घटमद्राक्षं सोऽहं इदानीं स्पृशामि इति ज्ञानं न जायेत। एकस्मिन् अनुभवः संजातः। तेन अन्यस्मिन् स्मृतिः न जायते। तस्मात् देहेन्द्रियव्यतिरिक्तो

जीवः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। जीवात्मा न परमाणुपरिणामः। यदि जीवात्मा परमाणुपरिमाणः चेत् सर्वशरीरव्यापि सुखाद्यनुपलब्धिप्रसङ्गात्। घटादिरिव न मध्यमपरिणामः। तथा सति अनित्यत्वप्रसङ्गेन कृतस्य फलं नष्टं भवेत्, अकृतस्य फलमनुभववेद्यं च भवेत्। अतः जीवात्मा नित्यः विभुः च।

**मनसः लक्षणं विशदयति ।**

**तर्कसंग्रहः- सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।**

**व्याख्या-** सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वं मनसः लक्षणम्। उपलब्धिः साक्षात्कारः। एकस्य आत्मनः एकं मन इव आत्मानुसारं मनांसि वर्तन्ते। अतः मनः अनन्तम्।

**दीपिका-** मनसो लक्षणमाह- सुखेति। स्पर्शरहितत्वे सति क्रियावत्वं मनसो लक्षणम्। मनो विभजते- तच्चेति। एकैकस्य आत्मनः एकैकं मनः आवश्यकम् इत्यात्मनो अनेकत्वात् मनसोऽप्यनेकत्वं इत्यर्थः। मन परमाणुरूपम्। मध्यमपरिमाणत्वे अनित्यत्वप्रसङ्गात्। परमाणोः परिणामं मनः इत्यङ्गीक्रियते चेत् अनित्यत्वं, नाशात्मकत्वं च जायेत।

आत्मा विभुः भवति। मनः अपि विभु इत्यङ्गीकरोति चेत् आत्ममनःसंयोगः कथं जायते? संयोगे क्रिया आवश्यकी। विभुत्वे क्रिया न। सर्वव्यापित्वमेव विभुत्वम्। विभुद्रव्यसंयोगो अस्तु इति न च वाच्यम्। तत्संयोगस्य नित्यत्वे न सुषुप्त्यभावप्रसङ्गात्। मनः परमाणुः इत्यङ्गीकारे तु यदा पुरीतति (नाड्यां) मनसः प्रवेशे सुषुप्तिः जायते, यदा पुरीततः मनः बहिरागच्छति तदा ज्ञानोत्पत्तिः स्यात् इत्यङ्गीकर्तुं शक्यते। अतः मनः परमाणुः इति सिद्ध्यति ।

## पुनरावृत्तिः(Recap)

- गन्धवती पृथिवी। सा द्विधा। नित्या अनित्या च।
- शीतस्पर्शवत्यः आपः । ताः द्विविधाः । नित्याः अनित्याः च।
- उष्णस्पर्शवत्तेजः । तद् द्विविधम्। नित्यम् अनित्यं च।
- रूपस्पर्शवान् वायुः। सः द्विविधः । नित्यः अनित्यः च।
- सृष्टिप्रलयनिरूपणम्। ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते। परमाणुद्धयं द्व्यणुकम्। त्रिभिः द्व्यणुकैः त्र्यणुकम् इत्यादिक्रमेण उत्पन्नस्य कार्यद्रव्यस्य संजिहिर्षा। परमाणुषु क्रिया। परमाणुद्वयविभागे द्व्यणुकनाशः । ततः त्र्यणुकनाशः।
- एवं क्रमेण पृथिव्यादिनाशः।
- शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च।
- अतीतादिव्यव्यवहारहेतुः कालः। स च एकः विभुः नित्यश्च ।
- प्राच्यादिव्यवहारहेतुः दिक् । सा एका नित्या विभ्वी च।
- ज्ञानाधिकरणमात्मा। सः द्विविधः। जीवात्मा परमात्मा चेति।
- सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तद् अनन्तं, परमाणुरूपं, नित्यं च।

## वस्तुनिष्ठप्रश्नाः (Objective type question)

1. रूपरहितत्वे सति स्पर्शवत्वं --लक्षणम् ।(रिक्तं पूरयत)
2. किं नाम नैमित्तिकद्रवत्वम् ?
3. जलशरीरं किम् ?
4. प्राच्यादिव्यवहारहेतुः—। (रिक्तं पूरयत)

5. सः द्विविधः सुरभिः असुरभिः च। सः कः?
6. अतीतादि व्यवहारहेतुः—।( रिक्तं पूरयत)
7. आत्मनः लक्षणं किम्?
8. दिशः लक्षणं किम्?

**एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत**

**(Answer the following questions in one or two sentences)**

1. किं नाम द्रवत्वम् ?
2. स्नेहस्य लक्षणे गुणपदस्याभावे कः दोषः ?
3. स्पर्शः कतिविधः ? कानि ?
4. मनसः लक्षणं किम्?
5. पृथिव्याः लक्षणं किम्?

**एकैकया खण्डिकया उत्तराणि लिखत।**

**(Answer the following questions in a paragraph)**

1. पृथिव्याः लक्षणं विशदयत।
2. अपां लक्षणं विशदयत।
3. तेजसः लक्षणं विशदयत।
4. वायुं निरूपयत।
5. आत्मनः लक्षणं विशदयत।
6. मनसः लक्षणं विशदयत।

SGOU

## निर्दिष्टाभ्यासाः (Assignments)

1. सुवर्णस्य पार्थिवत्वम् आशङ्क्य तैजसत्वं समर्थयत।
2. सृष्टिप्रलयस्वरूपं निरूपयत।
3. तमसः द्रव्यान्तरत्वमाशङ्क्य निराकुरुत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. वायोः।
2. तेजःसंयोगजन्यम्।
3. वरुणलोकम्।
4. दिक्।
5. गन्धः।
6. कालः।
7. ज्ञानाधिकरणमात्मा।
8. प्राच्यादिव्यवहारहेतुः दिक् ।
9. सुखाद्युपलब्धिसाधनमिन्द्रियं मनः ।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.

## अधिकवाचनग्रन्थाः (Suggested Readings)

1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

SGOU

# Unit -2
# अतिरिक्तद्रव्याणां निराकरणम्

## उद्देश्यानि(Learning Outcomes)

- पृथिव्यादिद्रव्यपदार्थानां सामान्यज्ञानम्।
- नवद्रव्याणां लक्षणं, भेदपुरसरं स्वरूपं च ज्ञायते।
- सृष्टिप्रलयलक्षणम् अवगन्तुं शक्नोति।
- तमसः अतिरिक्तद्रव्यत्वं वा नवेति वेत्स्यति।
- पाकजगुणानां लक्षणानि भेदान् च अवगन्तुं शक्तः भवति।

## प्राग्व्यपेक्षाः(Pre requisites)

तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनं उद्देशः। द्रव्य गुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव। द्रव्याणां नामानि जानन्ति। द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। पुनः पृथिव्यादीनां भेदाः लक्षणानि च प्रतिपादयन्ति। उक्तेषु नवद्रव्येषु अतिरिक्ततया द्रव्याणि न सन्तीति समर्थयति।

## मुख्यपदानि (Key words)

पृथ्वी, आपः,तेजः, वायु, आकाशं, कालः,दिक्, आत्मा, मनः, शीतस्पर्शवत्वम्, उष्णस्पर्शवत्, रूपरहितत्वं, शब्दगुणकम्, अतीतादिव्यवहारहेतुः, ज्ञानाधिकरणं, चक्षुमात्रग्राह्यः, रसनाग्राह्यः, घ्राणग्राह्यः, श्रोत्रग्राह्यः ।

## Discussion

### अतिरिक्त द्रव्याणां निराकरणम् ।

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव द्रव्याणि। तत्र तमसः दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि इति पूर्वपक्षः। तथा हि तमः खलु चलं नीलं

परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो हेतुमर्हति इति। नीलं तमः चलति इत्यबाधितप्रतीतिबलात् नीलरूपस्याधारतया चलनात्मकक्रियाधारतया च द्रव्यत्वं तावत्सिद्धम्। तत्र तमसः आकाशादिपञ्चके नान्तर्भावः, रूपवत्वात्। स्पर्शवत्वात् वायौ नान्तर्भावः। सदागतित्वाभावाच्च। भास्वररूपाभावात् उष्णस्पर्शाभावाच्च तेजसि नान्तर्भावः। शीतस्पर्शाभावात् नीलरूपाश्रयत्वात् च जले नान्तर्भावः। गन्धवत्वाभावात् स्पर्शरहितत्वात् च पृथिव्यां नान्तर्भावः। तस्मात् तमो दशमद्रव्यमिति पूर्वपक्षः ।

अत्रेदं समाधानम्। तेजोऽभावः एव तमः। तमो हि न रूपिद्रव्यम्। प्रकाशस्य साहाय्यं विना चक्षुरिन्द्रियेण तमः गृह्णातुं शक्यते। रूपिद्रव्यं चक्षुषा द्रष्टुं तस्मिन् द्रव्ये प्रकाशसान्निध्यमावश्यकम्। अतः प्रौढप्रकाशकतेजोसामान्याभावः तमः। अपि च नीलं तमः चलतीति प्रत्ययः भ्रमः। अतः नव द्रव्याणि । तमसः न दशमद्रव्यत्वम् ।

## सुवर्णस्य पार्थिवत्वम् आशङ्क्य तैजसत्वं समर्थयति ।

उष्णत्वे सति स्पर्शवत्वं तेजसः लक्षणम्। तेजः द्विविधं- नित्यम्, अनित्यं च । नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं- शरोरेन्द्रियविषयभेदात्। तेषु विषयः चतुर्विधः भौमदिव्योदर्याकरजभेदात्। तत्र आकरजं सुवर्णादि।

अत्रेदमाशङ्का। सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् वा हरिद्रावत् इति।

अत्रेदं समाधानम्। अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते द्रवत्वनाशादर्शनेन असति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारण-भावावधारणात् सुवर्णस्य अत्यन्तानलसंयोगे सति द्रवत्वं न नश्यति। अतः पीतवर्णद्रव्येण साकं द्रवत्वयुक्तं कश्चिदपि सुवर्णामस्ति। अस्मिन् द्रव्ये द्रवत्वं अग्निसंयोगेन एव सिध्यति इत्यतः जलम्। पीतत्वात् वाय्वादिषु नान्तर्भवति। यदि पृथिवी तर्हि अत्यन्तानलसंयोगेन द्रवत्वं नष्टं भूयात्। तथा न संभवति। अतः सुवर्णस्य कश्चन भेदः। अतः सुवर्णं तैजसम्।

## पुनरावृत्तिः(Recap)

- नव द्रव्याणि - तमसः दशमद्रव्यत्वं न। तेजोऽभाव एव तमः । प्रौढप्रकाशकतेजोसामान्याभावः एव तमः ।
- सुवर्णस्य तैजसत्त्वम्। न तु पार्थिवत्वम्।
- अत्यन्तानलसंयोगे सति पार्थिववस्तुनः यादृशं व्यतियानमस्ति तादृशं व्यतियानं सुवर्णस्य अत्यन्तानलसंयोगे न संभवति।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. उष्णत्वे सति स्पर्शवत्वं -- लक्षणम्।
2. तेजः कति विधम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. किं नाम तमः?

## एकैकया खण्डिकयाउत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. 'तमसः दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि इति' विशदयत।

## निर्दिष्टाभ्यासाः(Assignments)

1. सुवर्णस्य पार्थिवत्वम् आशङ्क्य तैजसत्वं समर्थयत।
2. तमसः अतिरिक्तद्रव्यत्वं वा नवा इति प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. तेजसः
2. द्विविधम्।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit -3
# पाकजगुणाः

## उद्देश्यानि(Learning Outcomes)

- न्यायदर्शने तर्कसंग्रहस्य अवबोधं ज्ञायते।
- चतुर्विंशति गुणानां सभेदं सामान्यज्ञानम्।
- पदार्थज्ञानं लभते।
- पाकप्रक्रियां परिचिनोति।
- शब्दपर्यन्तानां गुणानां सभेदपुरस्सरं सामान्यज्ञानं च।।

## प्राग्व्यपेक्षाः(Pre requisites)

षोडशपदार्थतत्त्वज्ञानेन निश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनं, द्रव्यगुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। पुनः पृथिव्यादीनां लक्षणानि। गुणविभजनं- गुणान् विभजतेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुणः। पाकजगुणाः चत्वारः। रूपं, रसः, गन्धः, स्पर्शः च पाकजगुणाः संख्यातः शब्दपर्यन्तेषु एकादश गुणाः सन्ति। ते संख्या, परिमाणं, पृथक्त्वं संयोगः, विभागः, परत्वम्, अपरत्वं, गुरुत्वं, स्नेहः,शब्दः च।

## मुख्यपदानि (Key words)

चतुर्विंशतिगुणाः, आभास्वरशुक्लं, भास्वरशुक्लं, सुरभिरसुरभिः, चक्षुर्मात्रग्राह्यः, पाकजगुणाः, रूपं, रसः, गन्धः, स्पर्शः।

## Discussion

### पाकजगुणाः।

पाकजगुणाः चत्वारः। रूपरसगन्धाः स्पर्शाः च पाकजगुणाः।

### रूपं लक्षपति।

**तर्कसंग्रहः- चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। आभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।**

**व्याख्या-** चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणम्। संख्यातौ अतिव्याप्तिवारणाय मात्रपदम्। रूपत्वे रूपाभावे चातिव्याप्तिवारणाय गुणपदम् । येन इन्द्रियेण, यो व्यक्तिः गृह्यते, तेनैव इन्द्रियेण तनिष्ठा जातिः तदभावश्च गृह्यते इति नियमात्।

**दीपिका-** रूपं लक्षयति- चक्षुरिति। संख्यादावतिव्याप्तिवारणाय मात्रपदम्। रूपाभावे चातिव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्वं वाच्यम्। रूपं विभजते- तच्चेति। रूपं सप्तविधम्। शुक्ल-नील-पीत-रक्त-हरित- कपिश-चित्रभेदात्।

अत्र अव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेत् न, रूपस्य व्यावृत्तिनियमात्। चित्रपटेऽवयवरूपस्य प्रतीतिरस्तु इति न च वाच्यम्। रूपरहितत्वेन पटस्याप्रत्यक्षप्रसङ्गात्।

वस्त्रस्य समवायिकारणे तन्तौ रूपमस्ति। तदा स समवायसम्बन्धेन वर्तमाने वस्तुनि प्रत्यक्षमस्ति इति अङ्गीक्रियते चेत् गौरवमस्ति। चित्ररूपमङ्गीक्रियते चेत् अनुपपत्तिं दुरीकर्तुं शक्यते। रूपाश्रयमाह पृथिवीति। आश्रयं विभज्य दर्शयति तत्रेति।

**चित्ररूपसिद्धिः-** एकस्मिन् द्रव्ये एकाधिकानां रूपाणां सद्भावि तद्रव्ये चित्ररूपं वर्तते। वैशेषिकाः चित्ररूपमङ्गीकुर्वन्ति। केचन गुणाः व्याप्यवृत्तिनः, केचन अव्याप्यवृत्तिनः च भवन्ति। रूपं व्याप्यवृत्ति भवति। व्याप्यवृत्ति नाम आश्रये सर्वत्र व्यापकम्। कश्चन गुणः,

तस्याभावश्च एकस्मिन्नधिकरणे वर्तते चेत् सः गुणः अव्याप्यवृत्तिगुणः। संयोगः अव्याप्यवृत्तिगुणः । अवयवेषु रूपस्य प्रत्यक्षत्वे अवयवानां प्रत्यक्षं नास्ति इति वक्तव्यम्।

## रसं विशदयति।

**तर्कसंग्रहः- रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव।**

**व्याख्या -** रसनाग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम्। रसत्वे रसाभावे चातिव्याप्तिवारणाय गुणपदम् ।

**दीपिका-** रसं लक्षयति- रसनेति। रसत्वेऽतिव्याप्तिवारणाय गुणपदम्। रसाश्रयमाह- पृथिवीति। आश्रयं विभज्य दर्शयति ।

## गन्धं लक्षयति ।

**तर्कसंग्रहः- घ्राणग्राह्यो गुणः गन्धः। स च द्विविधः सुरभिः असुरभिश्च। पृथिवीमात्रवृत्तिः।**

**व्याख्या-** घ्राणग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। गन्धत्वे गन्धाभावे चातिव्याप्तिवारणाय गुणपदम् ।

**दीपिका-** गन्धं लक्षयति- घ्राणेति। गन्धत्वे अतिव्याप्तिवारणाय गुणपदम् ।

**व्याख्या-** यदि गुणः गन्धः इत्युच्यते चेत् इतरेषु गुणेषु अतिव्याप्तिः ।

## स्पर्शं विशदयति।

**तर्कसंग्रहः- त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः ।**

**व्याख्या-** त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम्। स्पर्शत्वे स्पर्शाभावे चातिव्याप्तिवारणाय गुणपदम्। संख्यादौ अतिव्याप्तिवारणाय मात्रपदम्। स्पर्शः पृथिव्यां जले तेजसि वायौ च वर्तते। तत्र शीतं जले। उष्णः तेजसि वर्तते। अनुष्णाशीतः पृथिव्यां वायौ च।

**दीपिका-** स्पर्शं लक्षयति- त्वगिति। स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदम्। संयोगादावतिव्याप्तिवारणाय (संख्या-परिमाण पृथक्त्व संयोग विभागेषु) मात्रपदम् ।

## रूपचतुष्टयस्य सविशेषता।

**तर्कसंग्रहः- रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्र अपाकजं नित्यमनित्यम्। नित्यगतं नित्यम्। अनित्यगतम् अनित्यम्।**

**व्याख्या-** नित्ये (परमाणौ) आगतं नित्यम्। अनित्ये (द्व्यणुकादौ) आगतम् अनित्यम् ।

**दीपिका-** पाकजमिति। पाकस्तेजसंयोगः। तेन पूर्वरूपं नश्यति, रूपान्तरमुत्पद्यते इत्यर्थः। अत्र परमाणुष्वेव पाकः, न द्व्यणुकादौ। आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनः द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणम्, तेजसंयोगोऽ समवायिकारणा अदृष्टादिकं निमित्तकारणम्।

अत्र वैशेषिकाः एवं वदन्ति। वैशेषिकाः पीलुपाकवादिनः। पीलुः परमाणुः। परमाणुषु तेजःसंयोगेन रूपान्तरोत्पत्तौ परमाणवः समवायिकरणम्, तेजः संयोगः असमवायिकरणम् अदृष्टादिकं निमित्तकारणम् च भवन्ति ।

नैयायिकाः एवमभिप्रयन्ति। नैयायिकाः पिठरवादिनः। पिठरः स्थाली। पूर्वघटस्य नाशं विना अवयविनि अवयवेषु च परमाणुपर्यन्तेषु युगपत् रूपान्तरोत्पत्तिः इति। अत एव पार्थिवपरमाणुरूपादिकम् अनित्यम् इत्यर्थः।

अन्यत्रेति। जलदावित्यर्थः। नित्यगतमिति। परमाणुगतम् इत्यर्थः। अनित्यगतमिति। द्व्यणुकादिनिष्ठमित्यर्थः। रूपादिचतुष्टयम्, उद्भूतप्रत्यक्षम्, अनुभूतप्रत्यक्षं च। उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः। प्रत्यक्षोत्पादनाय साहाय्यको धर्मः उद्भूतत्वम्। उद्भूताभावः अनुद्भूतः।

## पुनरावृत्तिः(Recap)

- चक्षुर्मात्रग्राह्यो गुणो रूपम्। तद् सप्तविधम् ।
- रसनाग्राह्यो गुणो रसः। सः षड्विधः ।
- घ्राणग्राह्यो गुणः गन्धः। सः द्विविधः सुरभिः असुरभिः च।
- त्वगिन्द्रियमात्रग्राह्यो गुणो स्पर्शः। सः त्रिविधः शीतोष्णानुष्णाशीतभेदात् ।
- रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्र अपाकजं नित्यम् अनित्यं च।
- वैशेषिकाः पीलुपाकवादिनः। पीलुः परमाणुः।
- नैयायिकाः पिठरवादिनः। पिठरः स्थाली।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. पाकजगुणाः कति?
2. त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणवत्वं कस्य लक्षणम्?
3. पीलुपाकवादिनः के?
4. पिठरवादिनः के?
5. गन्धस्य लक्षणं किम्?
6. रसस्यलक्षणं किम्?
7. रूपस्य लक्षणं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. रूपं कति विधम्? कानि च तानि?
2. रसस्य भेदाः के?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. रूपस्य लक्षणं विशदयत।
2. रसस्य लक्षणं विशदयत।
3. गन्धस्य लक्षणं विशदयत।
4. स्पर्शस्य लक्षणं विशदयत।
5. रूपचतुष्टयस्य सविशेषता का?

## निर्दिष्टाभ्यासाः(Assignments)

1. रूपादिचतुष्टयं पाकजमपाकजं कुत्र ?

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. चत्वारः।
2. स्पर्शस्य।
3. वैशेषिकाः।
4. नैयायिकाः।
5. घ्राणग्राह्यो गुणः गन्धः।
6. रसनाग्राह्यो गुणो रसः।

7. चक्षुर्मात्रग्राह्यो गुणो रूपम्।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।
4. विश्वनाथः, कारिकावली, चौखम्बा कृष्णदास् अक्कादमी, वारणासि 2012.


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit- 4
# संख्यातः शब्दपर्यन्ताः गुणाः

## उद्देश्यानि(Learning Outcomes)

- न्यायदर्शने तर्कसंग्रहस्य अवबोधं ज्ञायते।
- चतुर्विंशति गुणानां सभेदं सामान्यज्ञानम्।
- शब्दपर्यन्तानां गुणानां सभेदपुरसरं सामान्यज्ञानं च।।

## प्राग्व्यपेक्षाः(Pre requisites)

षोडशपदार्थतत्त्वज्ञानेन निःश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनम् उद्देशः। द्रव्यगुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। पुनः पृथिव्यादीनां लक्षणानि। गुणविभजनं- गुणान् विभजतेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुणः। संख्यातः शब्दपर्यन्तेषु एकादश गुणाः सन्ति। ते संख्या, परिमाणं, पृथक्त्वं संयोगः, विभागः, परत्वम्, अपरत्वं, गुरुत्वं, स्नेहः,शब्दः च। तान्यधिकृत्य पठामः।

## मुख्यपदानि (Key words)

संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः, परत्वम्, अपरत्वं, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः।

## Discussion

### संख्यातः शब्दपर्यन्ताः गुणाः ।

चतुर्विंशति गुणाः। संख्यातः शब्दपर्यन्तेषु एकादश गुणाः सन्ति। ते संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः, परत्वम्, अपरत्वं, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः च।

## संख्यां लक्षयति ।

**तर्कसंग्रहः- एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्थपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।**

**व्याख्या-** एकत्वादिव्यवहारस्य यत् असाधारणकारणं, सा संख्या। सर्वेषु द्रव्येषु संख्या वर्तते।

एकत्वादिपरार्थपर्यन्ता संख्या।

एकं दश शतं चैव सहस्रमयुतं तथा
लक्षं च नियुतं चैव कोटिरर्बुदमेव च।
वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः
अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम् ।।

एकत्वं नित्यमेकत्वम् अनित्यमेकत्वम् इति द्विधा। नित्यगतं नित्यम्। अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्र अनित्यमेव।

**दीपिका-** संख्यां लक्षयति -एकत्वेति ।

## परिमाणं विशदयत।

**तर्कसंग्रहः- मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्- अणु, महत्, दीर्घं, ह्रस्वं चेति।**

**व्याख्या-** मानव्यवहारासाधारणकारणत्वं परिमाणस्य लक्षणम्। नवद्रव्यवृत्ति। तत् चतुर्विधम्- अणु, महत्, दीर्घं, ह्रस्वं चेति।

**दीपिका-** परिमाणं लक्षयति- मानेति। परिमाणं विभजते- तच्चेति। भावप्रधानो निर्देशः- अणुत्वं, महत्वं, ह्रस्वत्वं, दीर्घत्वं चेति।

## पृथक्त्वं लक्षयति ।

**तर्कसंग्रहः- पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।**

**व्याख्या -** पृथक् इति शब्दप्रयोगस्य यद् असाधारणं कारणं तत् पृथक्त्वम् । सर्वेषु द्रव्येषु वर्तते।

**दीपिका-** पृथक्त्वं लक्षयति- पृथगिति। इदमस्मात्पृथगिति व्यवहारकारणमित्यर्थः। यत्र इदमस्मात् पृथक् इति शब्दप्रयोगः तत्र पृथक्त्वम् अस्ति।

## संयोगं लक्षयति।

**तर्कसंग्रहः- संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।**

**व्याख्या-** इमौ संयुक्तौ इति व्यवहारस्य यद् असाधारणं कारणं सः संयोग।

**दीपिका-** संयोगं लक्षयति- संयुक्तेति। इमौ संयुक्तौ इति व्यवहारहेतुः संयोगः। संख्यादिलक्षणे सर्वत्र दिक्कालादावतिव्याप्तिवारणाय असाधारणेति विशेषणम्। संयोगो द्विविधः- कर्मजः संयोगजश्च। हस्तक्रियया हस्तपुस्तकसंयोगः कर्मजः संयोगः। हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः संयोगजः संयोगः। अव्याप्यवृत्तिः संयोगः। स्वातन्त्र्याभाव-समानाधिकरणत्वम् अव्याप्यवृत्तित्वम् ।

**व्याख्या-** संयोगः अव्याप्यवृत्तिः। स्वं स्वस्याभावः च एकस्मिन्नधिकरणे तिष्ठति। गुणः गुणाभावः च एकस्मिन्नधिकरणे स्यात् ।

यथा- भूतलसंयोगेन घटः।

## विभागं लक्षयति।

**तर्कसंग्रहः- संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः।**

**व्याख्या-** संयोगनाशकत्वे सति गुणत्वं विभागस्य लक्षणम्। विभागः सर्वेषु द्रव्येषु वर्तते।

**दीपिका-** विभागं लक्षयति- संयोगेति। कालादौ अतिव्याप्तिवारणाय गुणः इति। रूपादौ अतिव्याप्तिवारणाय संयोगनाशकः इति। विभागोऽपि द्विविधः- कर्मजः विभागजश्च।

हस्तक्रियया हस्तपुस्तकविभागः कर्मजः विभागः। हस्तपुस्तकविभागात् कायपुस्तकविभागः विभागजः विभागः।

**व्याख्या-** संयोगनाशकः विभागः इति लक्षणं दीयते चेत् काले देशे चातिव्याप्तिः। अतः गुणपदम्। यदि गुणः विभागः इत्युच्यते चेत् रूपादिषु गुणेषु अतिव्याप्तिः। अतः संयोगनाशकः गुणः विभागः इति वक्तव्यम् इत्यर्थः। संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः च सर्वेषु द्रव्येषु अन्तर्भवन्ति।

## परत्वस्य लक्षणमाह।

**तर्कसंग्रहः- परव्यवहारासाधारणकारणं परत्वम्। पृथिव्यादिचतुष्टयमनोवृत्ति। तद् द्विविधम्- दिक्कृतं कालकृतं चेति। दुरस्थे दिक्कृते परत्वम्। ज्येष्ठे कालकृतं परत्वम्।**

**व्याख्या-** परव्यवहारासाधारणकारणत्वं परत्वस्य लक्षणम्। परत्वम् आपेक्षिकमेव। पृथिव्यां जले तेजसि वायौ मनसि च परत्वं वर्तते। दूरे वर्तमाने वस्तुनि दिक्कृतं परत्वम्, ज्येष्ठे कालकृतं परत्वं च वर्तते।

**दीपिका -** परत्वस्य लक्षणमाह- परेति। परव्यवहारासाधारणं कारणं परत्वम्। परत्वं विभजते। दिक्कृतस्योदाहरणमाह - दूरस्थ इति। कालकृते उदाहरति ज्येष्ठ इति।

## अपरत्वं लक्षयति।

**तर्कसंग्रहः - अपरव्यवहारासाधारणकारणम् अपरत्वम्। पृथिव्यादिचतुष्टयमनोवृत्ति। तद् द्विविधम्- दिक्कृतं कालकृतं चेति। समीपस्थे दिक्कृतमपरत्वम्। कनिष्ठे कालकृतमपरत्वम् ।**

**व्याख्या-** अपरव्यवहारासाधारणकारणत्वम् अपरत्वस्य लक्षणम्। अपरत्वं द्विधा- दिक्कृतं कालकृतं चेति।

**दीपिका-** अपरव्यवहारासाधारणकारणमपरत्वम्। अपरत्वं पृथिव्यां जले तेजसि वायौ मनसि च वर्तते। अपरत्वं द्विधा- दिक्कृतं कालकृतं च। समीपस्थे दिक्कृतमपरत्वम्। कनिष्ठे कालकृतमपरत्वम्।

## गुरुत्वं विशदयति।

**तर्कसंग्रहः- आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।**

**व्याख्या-** आद्यपतनासमवायिकारणत्वं गुरुत्वस्य लक्षणम्। वेगे अतिव्याप्तिवारणाय आद्यपदम्। गुरुत्वं पृथिव्यां जले च वर्तते।

**दीपिका-** गुरुत्वं लक्षयति- आद्येति। द्वितीयादिपतनस्य वेगासमवायिकारणत्वात् वेगेऽतिव्याप्तिवारणाय आद्येति।

**व्याख्या-** काचन क्रिया क्षणचतुष्टयं स्थास्यति। क्रियोत्पत्तिः प्रथमे क्षणे जायते। क्रिया यस्मिन् संजातं तस्य विभागः द्वितीये क्षणे जायते। तृतीये क्षणे पूर्वसंयोगः नश्यति। चतुर्थे क्षणे उत्तरदेशसंयोगः क्रियानाशः च जायते। आद्यपतनस्यासमवायिकारणं गुरुत्वम्। पुनः वेगः एव द्वितीयपतनस्यासमवायिकारणम् ।

## द्रवत्वं लक्षयति ।

**तर्कसंग्रहः- आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद् द्विविधम्- सांसिद्धिकं, नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

**व्याख्या-** द्रवत्वं नाम द्रवरूपावस्था। आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। द्वितीयस्यन्दनादौ वेगः असमवायिकारणम्। अतः वेगे अतिव्याप्तिदूरीकरणाय आद्य इति। स्यन्दनं स्रवणम्। द्रवत्वं पृथिव्यां जले तेजसि च वर्तते। द्रवत्वं द्विविधम्। सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं स्वाभाविकं द्रवत्वम्। तेजःसंयोगजन्यं नैमित्तिकद्रवत्वम्। जले सांसिद्धिकं द्रवत्वम्। पृथिव्यां अग्निसंयोगेन घृतादौ जायमानं द्रवत्व नैमित्तिकम्। तेजसि सुवर्णादौ नैमित्तिकं द्रवत्वम्।

**दीपिका-** द्रवत्वं लक्षयति आद्यस्यन्दनेति। स्यन्दनं स्रवणम्। तेजः संयोगजन्यं नैमित्तिकद्रवत्वम्। तद्भिन्नं सांसिद्धिकद्रवत्वम्। पृथिव्यां नैमित्तिकद्रवत्वमुदाहरति- घृतादाविति । तेजसि तदाह सुवर्णादाविति ।

**स्नेहं विशदयति ।**

**तर्कसंग्रहः- चूर्णादिपिण्डीभावहेतुः गुणः स्नेहः। जलमात्रवृत्तिः।**

**व्याख्या-** स्नेहः स्निग्धता। चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। गुणपदस्याभावे कालादौ अतिव्याप्तिः। गुणः स्नेहः इत्येवं लक्षणं कथयति चेत् रूपादिषु अतिव्याप्तिः । जले एव स्नेहः वर्तते। नान्यत्र।

दीपिका- स्नेहं लक्षयति चूर्णेति। कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय पिण्डीभाव इति।

**शब्दं लक्षयति ।**

**तर्कसंग्रहः- श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। सः द्विविधः- ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।**

**व्याख्या-** श्रोत्रेन्द्रियग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम्। शब्दत्वे शब्दाभावे चातिव्याप्तिवारणाय गुणपदम्। शब्दः आकाशे एव वर्तते। शब्दः द्विविधः- ध्वन्यात्मकः (ध्वनिस्वरूपः) वर्णात्मकः (वर्णस्वरूपः) चेति। तत्र ध्वन्यात्मकः भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

**दीपिका-** शब्दं लक्षयति- श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय गुण इति। रूपत्वे अतिव्याप्तिवारणाय श्रोत्रेति। शब्दस्त्रिविधः- संयोगजः विभागजः शब्दजश्चेति। तत्राद्यो भेरीदण्डसंयोगजन्यः। द्वितीयः वंश उत्पाट्यमाने दलद्वयविभागजन्यः चटपटाशब्दः। भेर्यादिदेशादारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः।

**व्याख्या-** शब्दः संयोगेन विभागेन वा प्रथमं जायते। जातात् शब्दात् शब्दतरङ्गाः जायन्ते। प्रथमात् शब्दात् द्वितीयः शब्दः, द्वितीयात् तृतीयशब्दः इत्येवं रूपेण शब्दतरङ्गाः। ते शब्दजाः । शब्दः वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा सञ्चरतीति वैशेषिकाः।

## पुनरावृत्तिः(Recap)

- एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः ।
- मानव्यवहारासाधारणं कारणं परिमाणम्। तद् चतुर्विधम् ।
- पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।
- संयुक्तव्यवहारहेतु संयोगः । सर्वद्रव्यवृत्तिः । संयोगः द्विविधः । कर्मजः संयोगजश्च ।
- संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः । विभागः द्विविधः । कर्मजः विभागजश्च।
- परव्यवहारसाधारणं कारणं परत्वम्। तद् द्विविधम् । दिक्कृतं कालकृतं च।
- अपरव्यवहारसाधारणं कारणम् अपरत्वम् । तद् द्विविधम् दिक्कृतं, कालकृतं च।
- आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।
- आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति ।
- चूर्णादिपिण्डीभावहेतुः गुणः स्नेहः। जलमात्रवृत्तिः ।
- श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । सः द्विविधः ध्वन्यात्मकः वर्णात्मकः चेति

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. एकत्वादिव्यवहारहेतुः-------।(रिक्तं पूरयत)
2. परिमाणस्य लक्षणं किम्?
3. संयोगस्य लक्षणम् किम् ?
4. विभागस्य लक्षणम् किम्?
5. गुरुत्वस्य लक्षणम् किम्?
6. स्नेहस्य लक्षणम् किम्?
7. शब्दः कति विधः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. परिमाणस्य किं लक्षणं, तस्य भेदाः के ?
2. पृथक्त्वस्य किं लक्षणम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. सङ्ख्यायाः किं लक्षणम्, सा कुत्र वर्तते?
2. परत्वाऽपरत्वयोः किं लक्षणं, भेदाः के ?
3. द्रवत्वस्य कि लक्षणं, भेदाः के ?
4. शब्दस्य कि लक्षणम्, सः कतिविधः?

## निर्दिष्टाभ्यासाः(Assignments)

1. रूपादिचतुष्टयस्य सविशेषतां प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. संख्या
2. मानव्यवहारासाधारणकारणं परिमाणम्।
3. संयुक्तव्यवहारहेतु संयोगः ।
4. संयोगनाशको गुणो विभागः।
5. आद्यपतनासमवायिकारणं गुरुत्वम् ।
6. चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः ।

7. द्विविधः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

BLOCK -4

# प्रत्यक्षप्रमाणम्

SGOU

# Unit 1
# बुद्धिभेदौ

## उद्देश्यानि(Learning Outcomes)

- भारतीयदर्शनानां प्राधान्यावगमनाय ।
- तर्कशास्त्रमधिकृत्य सामान्यावबोधाय ।
- प्रमाणानां सामान्यज्ञानाय ।
- बुद्धिभेदौ जानाति।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः,

भारतीयदर्शनान्यधिकृत्य युष्माभिः श्रुतं ? तर्कशास्त्रस्य प्राधान्यमपि अवगतं खलु। पुनः सप्तपदार्थान्, तत्र नवद्रव्याणि कानि, गुणाः के इत्यादिकं पठितम् च। अधुना बुद्धेः लक्षणादारभ्य प्रत्यक्षप्रमाणपर्यन्तं पठामस्तावत् ।

## मुख्यपदानि (Key words)

बुद्धिः, स्मृतिः, अनुभवः, यथार्थानुभवः, अयथार्थानुभवः (अप्रमा), प्रत्यक्षं, करणम्, कार्यम्, कारणत्रैविध्यम्, समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम्, इन्द्रियार्थसन्निकर्षः, निर्विकल्पकम्, सविकल्पकम्।

## Discussion

### 4.1 बुद्धिभेदौ ।

पदस्यार्थः पदार्थः इति व्युत्पत्या अभिधेयत्वं पदार्थसामान्यलक्षणम्। गुणाः चतुर्विंशतिः इत्युक्तं खलु । गुणेषु मध्ये एकः भवति बुद्धिः । सर्वव्यवहारहेतुर्गुणो बुद्धिः ज्ञनम्। सर्वव्यवहारहेतुत्वे सति गुणत्वं बुद्धेः लक्षणम् इति। लक्षणेऽस्मिन् गुण इति पदस्य प्रयोजनं कालादावतिव्याप्तिवारणाय। रूपादौ अतिव्याप्तिनिवारणाय सर्वव्यवहार इति पदम्। जानामीति अनुव्यवसायगम्यज्ञानत्वमेव लक्षणम् इति ।

सा बुद्धिः द्विविधा। स्मृतिः, अनुभवः च। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः। संस्कारमात्रजन्यत्वे सति ज्ञानत्वं स्मृतेः लक्षणम्। तत्र भावनाख्यो व्यापारः संस्कारः। संस्कारध्वंसे अतिव्याप्तिवारणाय ज्ञानमिति पदं लक्षणे। घटादिप्रत्यक्षे अतिव्याप्तिवारणाय ज्ञानमितिपदं लक्षणे। घटादिप्रत्यक्षे अतिव्याप्तिनिवारणाय मात्रेति पदम् ।

तद्भिन्नं ज्ञानमनुभवः। अर्थात् स्मृतिभिन्नम् इति। स्मृतिभिन्नत्वे सति ज्ञानत्वमनुभवस्य लक्षणम्। अनुभवः द्विविधः यथार्थानुभवः, अयथार्थानुभवः च।

**यथार्थानुभवः-** तद्वति तत्प्रकारकोऽनुभवः यथार्थः। यथा-- रजते इदं रजतमिति ज्ञानम्। सैव प्रमेत्युच्यते। अर्थात् तद्वति रजतत्ववति रजते तत्प्रकारकः रजत्वप्रकारः अनुभवः यथार्थानुभवः इति।

ननु घटे घटत्वमिति प्रमायामव्याप्तिः घटत्वे घटाभावादिति चेन्न । यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभवः इत्यर्थात् घटत्वे घटसम्बन्धोऽस्तीति नाव्याप्तिः। यथार्थानुभवः एव प्रमा इत्युच्यते।

ज्ञानम्, इच्छा, द्वेषः, प्रयत्नः इति चतुर्गुणाः सविषयकाः। घटविषयकज्ञानं, धनविषयकेच्छा, दुःखविषयकः द्वेषः, घटादिविषयकप्रयत्नः इत्यादि व्यवहारः लोकप्रसिद्धः। एवं विषयं विना ज्ञानं, इच्छा,द्वेषः, प्रयत्नः च नास्ति इति सारः।

**अयथार्थानुभवः-** तदभाववति तत्प्रकारकः अनुभवः अयथार्थः। यथा - शुक्तौ इदं रजतमिति ज्ञानम्। सैवाप्रमेत्युच्यते ।

अर्थात् तदभाववति रजत्वाभाववति शुक्तौ तत्प्रकारः रजतप्रकारकः अनुभवः। रज्जौ सर्पज्ञानं वा। अयथार्थानुभवः एव अप्रमा इत्युच्यते।

ननु इदं संयोगी इति प्रमायामतिव्याप्तिः इति चेत्, न । यदवच्छेदेन यत्सम्बन्धाभावः तदवच्छेदेन तत्सम्बन्धज्ञानस्य विवक्षितत्वात्। संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्, संयोगावच्छेदेन संयोगसम्बन्धस्य सत्वात् नातिव्याप्तिः।

यथार्थानुभवः चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। प्रत्यक्षः, अनुमितिः,उपमितिः, शाब्दः इति भेदात् यथार्थानुभवः चतुर्विधः। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।

**पुनरावृत्तिः (Recap)**

- बुद्धेः द्वैविध्यं स्मृतिः अनुभवः च।
- संस्कारमात्रजन्यं ज्ञानं स्मृतिः। स्मृतिभिन्नं ज्ञानमनुभवः ।
- यथार्यानुभवः अयथार्थानुभवः चेति द्विविधः।
- यथार्थानुभवः चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।
- तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सर्वव्यवहारहेतुत्वे सति गुणत्वं ---लक्षणम्।(रिक्तं पूरयत)
2. बुद्धिः कति विधम्? के च ते?
3. गुणेषु मध्ये एकः भवति---।(रिक्तं पूरयत)
4. स्मृतिः नाम किम्?
5. सर्वव्यवहारहेतुत्वे सति गुणत्वम् इति लक्षणे गुणपदस्य प्रयोजनमं किम्?
6. अनुभवः नाम किम्?
7. यथार्थानुभवभेदाः के ?
8. भावनाख्यो व्यापारः------।(रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. यथार्थानुभवस्य किं लक्षणम् ?
2. पदार्थसामान्यलक्षणं किम्?
3. अयथार्थानुभवस्य किं लक्षणम् ?

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. बुद्धिलक्षणं, भेदौ च सूचयत।
2. अनुभवस्य लक्षणं किम् ? कति विधः ?लिखत।

## निर्दिष्टाभ्यासाः(Assignments)

1. ज्ञानस्वरूपं तद्भेदान् च विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. बुद्धेः।
2. स्मृतिः अनुभवः चेति बुद्धेः द्वौ भेदौ।
3. बुद्धिः।
4. संस्कारमात्रजन्यं ज्ञानं स्मृतिः।
5. कालादावतिव्याप्तिवारणाय।
6. तत्र भावनाख्यो व्यापारः संस्कारः।
7. चतुर्विधः। प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्।
8. संस्कारः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.


SGOU

# Unit-2
# कार्यकारणविचारः

## उद्देश्यानि (Learning Outcomes)

- तर्कसंग्रहग्रन्थस्य परिचयः।
- न्यायशास्त्रशैलीं अवगच्छति।
- ज्ञानस्वरूपं तद्भेदौ च जानन्ति।
- प्रमा-प्रमाणशब्दानां सामान्य ज्ञानम्।

## प्राग्व्यपेक्षाः(Prerequisites)

हे पठितारः,

भारतीयदर्शनान्यधिकृत्य युष्माभिः श्रुतं किल? तर्कशास्त्रस्य प्राधान्यमपि अवगतं खलु। पुनः सप्तपदार्थान्, तत्र नवद्रव्याणि कानि, गुणाः के इत्यादिकं पठितम् च। प्रत्यक्षादि यथार्थानुभवानां करणमपि चतुर्विधं प्रत्यक्षादिभेदात्। एतादृशानि कार्याणि पठामः।

## मुख्यविचाराः(Key Concepts)

कार्यं, कारणं ,करणम्, अन्यथासिद्धिः।

## Discussions

प्रत्यक्षादि यथार्थानुभवानां करणमपि चतुर्विधं प्रत्यक्षादिभेदात्।

**को नाम करणमित्याह ।**

असाधारणं कारणं करणम्। असाधारणत्वे सति कारणत्वं करणस्य लक्षणम्। साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारण इति पदं लक्षणे।

## कारणम्।

**कार्यनियतपूर्ववृत्तिः कारणम्।**

कार्यनियतपूर्ववृत्तित्वं कारणस्य लक्षणम्। लक्षणे नियते इति पदस्याभावे रासभादौ अतिव्याप्तिः। तत्परिहाराय नियत इति पदं लक्षणे निवेशितम्। कार्येऽतिव्याप्तिवारणाय पूर्ववृत्ति इति पदम्। ननु तन्तुरूपमपि पटं प्रति कारणमिति चेन्न। **अनन्यथासिद्धत्वे सति इति विशेषणत्वात्। अनन्यथासिद्धत्वं इत्यस्य अन्यथासिद्धिशून्यत्वम् इत्यर्थः।**

**व्याख्या-** कार्यनियतपूर्ववृत्ति **कारणम्। कार्यनियतपूर्ववृत्तित्वं कारणस्य लक्षणम्। लक्षणे नियत इति पदस्याभावे रासभादौ अतिव्याप्तिः।** तत्परिहाराय नियत इति पदं लक्षणे निवेशितम्। कार्येऽतिव्याप्तिवारणाय पूर्ववृत्ति इति पदम्। ननु तन्तुरूपमपि पटं प्रति कारणमिति चेन्न। **अनन्यथासिद्धत्वे सति इति विशेषणत्वात्। अनन्यथासिद्धत्वं** इत्यस्य अन्यथासिद्धिशून्यत्वम् इत्यर्थः।

## अन्यथासिद्धिः।

अन्यथासिद्धिः त्रिविधः। येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्।

यथा- तन्तुना तन्तुरूपं तन्तुत्वं च पटं प्रति।

अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम्। यथा - शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति आकाशस्य।

अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतं सर्वं अन्यथासिद्धम्।

यथा- पाकजस्थले गन्धं प्रति रूपप्रागभावस्य। एवं चानन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति।

## कार्यम्।

प्रागभावप्रतियोगि कार्यम्। प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्।

उत्पत्तेः पूर्वं कार्यस्य यो अभावः स प्रागभावः। यस्य अभावः उच्यते स तस्य प्रतियोगि।

## पुनरावृत्तिः (Recap)

- कार्यनियतपूर्ववृत्तिः कारणम्।
- अन्यथासिद्धिः त्रिविधः। येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्।
- प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. असाधारणत्वे सति कारणत्वं----लक्षणम्।
2. कारणस्य लक्षणं किम्?
3. कार्यनियतपूर्ववृत्तित्वम् इति कारणस्य लक्षणे पूर्ववृत्ति इति पदस्य प्रयोजनं किम्?
4. प्रागभावप्रतियोगित्वं ----------लक्षणम्।
5. अन्यथासिद्धिः कति विधः?
6. उत्पत्तेः पूर्वं कार्यस्य यो अभावः स --------।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. किं नाम करणम्? विशदयत।
2. करणस्य लक्षणं किम्?
3. यथार्थानुभवस्य कारणानि कानि?



SGOU

## एकैकया खण्डिकया उत्तराणि लिखत ।
**(Answer the following questions in a paragraph)**

1. कारणं सदलं विशदयत।
2. अन्यथासिद्धिः सभेदं विशदयत।

## निर्दिष्टाभ्यासाः (Assignments)

1. कार्यकारणविचारः निरूपयत।
2. अन्यथासिद्धिः कतिविधा ?विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. करणस्य।
2. कार्यनियतपूर्ववृत्तिः।
3. कार्येऽतिव्याप्तिवारणाय।
4. कार्यस्य।
5. त्रिविधः।
6. प्रागभावः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८

3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

**अधिकवाचनग्रन्थाः (Suggested Readings)**

1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

SGOU

# Unit- 3
# कारणत्रैविध्यम्

## उद्देश्यानि (Learning Outcomes)

- तर्कसंग्रहग्रन्थस्य परिचयः प्राप्नोति।
- न्यायशास्त्रशैलीं परिचाययति।
- कार्य-कारण स्वरूपम् अवजानति।
- तत्वशास्त्रे युक्तिविचारं निरूपयति ।

## प्राग्व्यपेक्षाः(Prerequisites)

हे पठितारः,

भारतीयदर्शनान्यधिकृत्य युष्माभिः श्रुतं किल ? तर्कशास्त्रस्य प्राधान्यमपि अवगतं खलु। पुनः सप्तपदार्थान्, तत्र नवद्रव्याणि कानि, गुणाः के इत्यादिकं पठितं च। प्रत्यक्षादि यथार्थानुभवानां करणमपि चतुर्विधं प्रत्यक्षादिभेदात्। कारणानां त्रैविदध्यमत्र पठामः।

## मुख्यपदानि(Keywords)

समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम्

## Discussion

### कारणत्रैविध्यम् ।

अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणस्य लक्षणमिति ।

कारणं त्रिविधं- समवाय्यसमवायिनिमित्तभेदात्। समवायिकारणम्, असमवायिकारणम्,

निमित्तकारणम् चेति कारणस्य त्रैविध्यमस्ति ।

### समवायिकारणम्।

**यत्समेवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा- तन्तवः पटस्य पटश्च स्वगतरूपादेः समवायिकारणम्।**

कार्येण सह समवेतं समवायसम्बन्धेन अथवा नित्यसम्बन्धेन यत् कारणं तत् समवायिकारणमिति।

यथा - तन्तवः पटस्य समवायिकारणम्। पटश्च स्वगतरूपादेः समवायिकारणम्।

## असमवायिकारणम्।

**कार्येण करणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्।**

**यथा- तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य ।**

कार्येण सह एकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। कार्येण पटेन सह एकस्मिन् तन्तौ समवेतत्वात् तन्तुसंयोगः पटस्यासमवायिकारणम्। कारणेन पटेन सह एकस्मिन् तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्य असमवायिकारणमिति ।

## निमित्तकारणम् ।

**तदुभयभिन्नं कारणं निमित्तकारणम्। यथा- तुरीवेमादिकं पटस्य।**

समवायि- असमयायिभिन्नं कारणं निमित्तकारणम् इत्यर्थः। तदेतत् त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

इति कारणत्रैविध्यम्।

**पुनरावृत्तिः (Recap)**

- अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणस्य लक्षणम्
- समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम् चेति कारणस्य त्रैविध्यमस्ति।
- यत्समेवेतं कार्यमुत्पद्यते तत् समवायिकारणम्।

- कार्येण करणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्।
- तदुभयभिन्नं कारणं निमित्तकारणम्।

**वस्तुनिष्ठप्रश्नाः (Objective type questions)**

1. कारणं कति विधम्? कानि च तानि?
2. यत्समेवेतं कार्यमुत्पद्यते तत् -----।(रिक्तं पूरयत)
3. समवायि-असमयायिभिन्नं कारणं -----।(रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

1. निमित्तकारणस्य लक्षणं किम्?
2. समवायिकारणस्य लक्षणं किम्?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

(Answer the following questions in a paragraph)

1. असमवायिकारणस्य लक्षणं किम्?
2. कारणं कति विधम्? सभेदं लक्षणं सूचयत।

**निर्दिष्टाभ्यासः (Assignment)**

1. कारणत्रैविद्ध्यं विशदयत।

SGOU

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. त्रिविधम्। समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम्।
2. समवायिकारणम्।
3. निमित्तकारणम्।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit- 4
# प्रत्यक्षलक्षणं विभागश्च

## उद्देश्यानि (Learning Outcomes)

- तर्कसंग्रहग्रन्थपरिचयः।
- तत्वशास्त्रे युक्तिविचारं निरूपयति।
- न्यायशास्त्रशैलीपरिचयः।
- प्रमाणानां सामान्यावबोधः।
- प्रत्यक्षप्रमाण स्वरूपज्ञानं ग्रहिष्यति।

## प्राग्व्यपेक्षाः (Prerequisites)

प्रमा-प्रमाणपदानां सामान्यज्ञानम् आर्जितम्। बुद्धिस्वरूपम्, अनुभवभेदश्च जानन्ति। यथार्थानुभवनां करणमपि चतुर्विधं प्रत्यक्षादिभेदात्। असाधरणत्वे सति कारणत्वं करणस्य लक्षणम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्विविधम् - निर्विकल्पकं सविकल्पकं चेति।

## मुख्यपदानि(Keywords)

प्रत्यक्षज्ञानं, सम्बन्धः, इन्द्रियार्थसन्निकर्ष,निष्प्रकारकं, निर्विकल्पकं, सप्रकारकं, सविकल्पकं, संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावः।

## Discussion

### प्रत्यक्षलक्षणम्।

**प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षप्रमाणस्य लक्षणमिति ।**

**तर्कसंग्रहः- इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षम्। (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) तद् द्विविधम्। निर्विकल्पकं, सविकल्पकं चेति।** इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षज्ञानस्य लक्षणम्।

**दीपिका-** तत्र प्रमाणचतुष्टयमध्ये इन्द्रियं चक्षुरादिकम्, अर्थः घटादिः, तयोः सन्निकर्षः (सम्बन्धः) संयोगादिः। तज्जन्यं ज्ञानं प्रत्यक्षमिति। **विशेषणविशेष्यसम्बन्धानवगहि-** ज्ञानमित्यर्थः ।

**तर्कसंङ्ग्रहः- तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।**

यथा – किञ्चिदिदमिति। सप्रकारकं ज्ञानं सविकल्पकम्।

यथा- डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति।

**दीपिका-** न तु निर्विकल्पके किं प्रमाणमिति चेत्, न। गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात्। विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसङ्गात् निविकल्पकसिद्धिः। नामजात्यादिविशेषणविशेष्य- सम्बन्धावगाहिज्ञानं सप्रकारकम् इति।

**व्याख्या-** इन्द्रियस्य वस्तुना सह सन्निकर्षे जाते प्रथमक्षणे निष्प्रकारकं निर्विकल्पकज्ञानमिति। द्वितीयक्षणे विशेषणविशेष्यसम्बन्धज्ञानं सम्भवति तत्सविकल्पज्ञानम्। यथा- घटत्वविशिष्टघटः। अत्र घटत्वं विशेषणं, घटः विशेष्यः, तयोः सन्निकर्षः समवायः। नामजात्यादिसम्बन्धावगहितज्ञानम् - नाम-जाति-गुणः-क्रिया इत्यादि सम्बन्धवान् इत्यर्थः।

यथा- डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयं गच्छन्नयम् इत्यत्र डित्थ इति नामवानयं, ब्राह्मणत्वजातिमानयं, श्यामवर्णोऽयं, गच्छन्- गमनक्रियायुक्तः पुरुषोऽयम् इत्यादि विशेषणविशेष्यसम्बन्धत्वात् अत्र सविकल्पकज्ञानं भवति।

**प्रत्यक्षज्ञानहेतुः- इन्द्रियार्थसन्निकर्षः ।**

**तर्कसंङ्ग्रहः-** प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्त्रिकर्षः षड्विधः- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः। घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः, चक्षुसंयुक्ते घटे घटरूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्। एवं सन्निकर्षषङ्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

**दीपिका-** इन्द्रियार्थसन्निकर्षं विभजते- प्रत्यक्षेति। संयोगसन्निकर्षमुदाहरति चक्षुषेति। द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्षः इत्यर्थः। आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियमर्थेन च। ततः प्रत्यक्षज्ञानमुत्पद्यते। संयुक्तसमवायमुदाहरति घटरूपेति। तत्र युक्तिमाह चक्षुसंयुक्तेति। संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति। समवायमुदाहरति श्रोत्रेति। तदुपपादयति कर्णेति। ननु दूरस्थशब्दस्य कथं श्रोत्रेण संबन्ध इति चेत् न वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दात् शब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसम्बन्धात् प्रत्यक्षत्वसंभवात्। समवेतसमवायमुदाहरति- शब्दत्वेति। विशेषणविशेष्यभावमुदाहरति अभावेति। तदुपपादयति घटाभाववदिति। भूतलं विशेष्यं, घटाभावो विशेषणम्। 'भूतले घटो नास्ति' इत्यत्र अभावस्य विशेष्यत्वं द्रष्टव्यम्। एतेन

अनुपलब्धेः प्रमाणान्तरत्वं निरस्तम्। यद्यत्र घटोऽभविष्यत् तदा भूतलमिवाद्रक्ष्यत्, दर्शनाभावान्नास्ति इति। तर्कितप्रतियोगिसमत्व विरोध्यनुपलब्धिसहकृतेन इन्द्रियेणैव अभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणान्तरत्वा सम्भवात्। अधिकरणत्वज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तो अनुपलब्धेः करणत्वस्या-युक्तत्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः सम्बन्धः। प्रत्यक्षज्ञानमुपसंहरन् तस्य कारणमाह एवमिति। असाधारणकरणत्वादिन्द्रियं प्रत्यक्षज्ञान करणमित्यर्थः। प्रत्यक्षमुपसंहरति तस्मादिति।

**व्याख्या-** प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः संयोगादिभेदेन षड्विधः। चक्षुरिन्द्रियेण घटे प्रत्यक्षे जाते संयोगः सन्निकर्षः । अर्थात् द्रव्यप्रत्यक्षे संयोगः सन्निकर्षः इति। आत्मा मनसा संयुज्यते मनः इन्द्रियेण संयुज्यते। ततः प्रत्यक्षज्ञानमिति।

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः यतः चक्षुषा अथवा इन्द्रियेण संयुक्ते घटे घटरूपं समवायसन्निकर्षेण तिष्ठति। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः। यतः चक्षुरिन्द्रियेण संयुक्ते घटे घटरूपं समवेतं- समवायसम्बद्धं, तत्र घटरूपे रूपत्वस्यापि समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशः श्रोत्रेन्द्रियः। शब्दस्य आकाशगुणत्वात्। गुणस्य शब्दस्य गुणिनः आकाशस्य च समवायात्। ननु दूरस्थशब्दस्य कथं श्रोत्रसम्बन्ध इति चेन्न शब्दात् शब्दान्तरोत्पत्तिक्रमेण श्रोत्रजातस्य शब्दस्य श्रोत्रेन्द्रियेण सम्बन्धात् प्रत्यक्षत्वसम्बन्धः। शब्दत्वसाक्षात्कारे समवेतसमवायसन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यन्त्र भूतलं विशेष्यं घटाभावो विशेषणं च। भूतले घटो नास्ति (भूतले घटाभावः) इत्यत्र भूतले इति विशेषणं घटाभावः विशेष्यं च द्रष्टव्यम्। एतेनानुपलब्धेः प्रमाणान्तरत्वं निरस्तम्। अत्र

उभयमपि विशेषणविशेष्यभावः सम्बन्धः। एवं अभावग्रहणे विशेषणविशेष्यभावः सन्निकर्षः ।

एवं सन्निकर्षङ्कजन्यं ज्ञानं प्रत्यक्षम् तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

## पुनरावृत्तिः(Recap)

- इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षप्रमाणस्य लक्षणम्।
- प्रत्यक्षज्ञानं द्विविधम्-निर्विकल्पकं सविकल्पकं चेति ।
- निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।
- सप्रकारक ज्ञानं सविकल्पकम् ।
- प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च इति।
- एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. प्रत्यक्षप्रमाणं कति विधम् ?
2. --------प्रत्यक्षप्रमाणस्य लक्षणम्।(रिक्तं पूरयत)
3. सन्निकर्षः कतिविधः ?
4. निष्प्रकारकं ज्ञानं ----------।(रिक्तं पूरयत)
5. घट प्रत्यक्षे कः सन्निकर्षः ?
6. घटरूपगुणप्रत्यक्षे कः सन्निकर्षः ?

7. शब्दप्रत्यक्षे कः सन्निकर्षः?
8. रूपत्वप्रत्यक्षे कः सन्निकर्षः ?
9. शब्दत्वसाक्षात्कारे कः सन्निकर्षः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. प्रत्यक्षप्रमाणलक्षणं किम्, कतिविधं च तत् ?
2. निर्विकल्पकस्य लक्षणं किम् ?
3. सविकल्पकस्य लक्षणं किम् ?
4. सन्निकर्षः कतिविधः? ते च के ?
5. अभावप्रत्यक्षे कः सन्निकर्षः ?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. सन्निकर्षः कति विधः? लिखत।
2. शब्दप्रत्यक्षे कः सन्निकर्षः ?

## निर्दिष्टाभ्यासाः(Assignments)

1. सन्निकर्षः कति विधः? व्याख्यात।
2. प्रत्यक्षप्रमाणं विशदयत।
3. सविकल्पक- निर्विकल्पक- ज्ञानस्वरूपं किम् ? विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. द्विविधम्।
2. प्रत्यक्षज्ञानकरणत्वम्।
3. षट्विधः।
4. निर्विकल्पकम्।
5. संयोगः।
6. संयुक्तसमवायः।
7. समवायसन्निकर्षः।
8. संयुक्तसमवेतसमवायः।
9. समवेतसमवायः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

BLOCK -5

# अनुमानप्रमाणम्

SGOU

# Unit– 1
# अनुमानभेदाः

## उद्देश्यानि (Learning Outcomes)

1. अनुमानप्रमाणस्य तभेदानां चावगमनाय ।
2. पञ्चावयवनां ज्ञानम् अवगच्छन्ति।
3. अनुमानप्रमाणस्वरूपम् अवगच्छन्ति।
4. अनुमानप्रक्रियां, एवम् अनुमानभेदं च अवजानन्ति।

## प्राग्व्यपेक्षाः(Prerequisites)

हे पठितारः,

स्मृतिः, अनुभवः, प्रत्यक्षादिभेदान्, प्रत्यक्षप्रमाणम् इत्यादिकं सलक्षणोदाहरणम् अस्माभिः पठितम्। पुनः अनुमानप्रमाणं पठितुमवसरः जातः।

## मुख्यपदानि(Keywords)

अनुमितिः, अनुमानम्, परामर्शः, पक्षता, संशयोत्तरप्रत्यक्षः, सिषाधयिषा, परामर्शजन्यं ज्ञानम्, अनुमितिकरणम् अनुमानम्, व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः, व्याप्तिः, स्वार्थानुमानम्, परार्थानुमानम्, व्यभिचारज्ञानम्, पञ्चावयवाः, लिङ्गम्।

## Discussion

### अनुमानभेदाः।

यथार्थानुभवः चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दमिति भेदात् इत्युक्तं किल।

**तर्कसंङ्ग्रहः- अनुमितिकरणम् अनुमानम्। परामर्शजन्यं ज्ञानम् अनुमितिः ।**

**व्याख्या-** अनुमितिकरणम् अनुमानस्य लक्षणम्। परामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेः लक्षणम्।

**दीपिका-** अनुसानं लक्षयति- अनुमितिकारणमिति। अनुमितेर्लक्षणमाह- परामर्शेति।

ननु संशयोत्तरप्रत्यक्षे अतिव्याप्तिः। स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयम् इति परामर्शे सति पुरुष एव इति प्रत्यक्षजननात्। न च तत्रानुमतिरेवेति वाच्यम्। पुरुषं साक्षात्करोमि इति अनुव्यवसायविरोधादिति चेत् न। पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिषाधायिषाविरहसहकृतसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमिति प्रतिबन्धिका सिद्धिसत्वेऽपि अनुमिनुयाम् इतीच्छायामनुमितिदर्शनात् सिषाधयिषोत्तेजिका। ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य वाहकारणत्ववत् सिषाधयिषाविरहसहकृत- सिद्ध्यभावस्यापि अनुमितिकारणत्वम् ।

**व्याख्या-** ननु संशयोत्तरप्रत्यक्षे अतिव्याप्तिः। दुरस्थं पुरुषं दृष्ट्वा स्थाणुर्वा पुरुषो वा इति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयम् इति परामर्शे सति पुरुष एव इति प्रत्यक्षज्ञानात् न च अत्र अनुमिति इति वाच्यम्, पुरुष साक्षात्करोमि अनुव्यवस्याविरोधात् इति चेन्न, पक्षता सहकृतपरामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेः लक्षणमिति विवक्षितत्वात्।

तत्र पक्षता नाम सिषाधाविषविरहविशिष्टसिद्ध्यभावः। सिद्धिः साध्यसिद्धिः। साध्यसिद्धिः अनुमितिप्रतिबन्धिका। सिद्धिसत्वेऽपि अनुमिनुयामिति इच्छायाम् अमुमिति दर्शनात् सिषाधयिषा उत्तेजिका भवति। ततः उत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्व स्वीकारवत् सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिकारणत्वम्।

**तर्कसंङ्ग्रहः- व्याप्तिविशिष्टपक्षधर्मता ज्ञानं परामर्शः।**

यथा - वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः।

**दीपिका-** परामर्शं लक्ष्ययति- व्याप्तीति। व्याप्तिविषयकं यत् दर्शयति- तथेति। अनुमितिमभिनीय दर्शयति- तज्जन्यमिति परामर्शजन्यमित्यर्थः ।

**तर्कसङ्ग्रहः- यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः।**

**दीपिका-** व्याप्तेर्लक्षणमाह- यत्रेति। यत्र धूमः तत्राग्निरिति व्याप्तेरभिनयः। साहचर्यनियमः इति लक्षणम्। साहचर्यसामानाधिकरण्यम्। तस्य नियमः- हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरण्यं व्याप्तिरित्यर्थः।

**व्याख्या-** सहचरतीति सहचरौ तयोर्भावः साहचर्यम्। साहचर्यं सामानाधिकरण्यमिति। तस्य नियमः साहचर्यनियमः । साहचर्यनियमः व्याप्तिः इति।

**उदा-** यत्र यत्र धूमः तत्र तत्र वह्निः इति साहचर्यनियमः व्याप्तिः।

यथा- महानसः इति साहचर्यनियमः व्याप्तिः। हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि साध्यसामानाधिकरण्यं व्याप्तिरिति अर्थः। हेतुः धूमः हेतुसमानाधिकरणं पर्वतः तत्रात्यन्ताभावः घटात्यन्ताभावः घटात्यन्ताभावस्य प्रतियोगि घटः अप्रतियोगि साध्यो वह्निः इति वह्नेः धूमस्य च समानाधिकरणत्वमस्ति इति व्याप्तिः ।

**तर्कसङ्ग्रहः-** व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

**दीपिका-** पक्षधर्मतास्वरूपमाह- व्याप्यस्येति।

**व्याख्या-** साध्यव्याप्तो हेतुः पक्षे वर्तते इति पक्षधर्मता। वह्निधूमयोः पर्वतादिवृत्तित्वं पक्षधर्मता इति।

## अनुमानभेदाः ।

**तर्कसङ्ग्रहः- अनुमानं द्विविधं स्वार्थं परार्थं च।**

**दीपिका-** अनुमानविभागमाह- अनुमानमिति। द्वैविध्यं दर्शयति- स्वार्थमित्यादिना।

**व्याख्या-** अनुमानं द्विविधम्। स्वार्थानुमानं, परार्थानुमानं च।

**तर्कसङ्ग्रहः-** तत्र स्वार्थ **स्वानुमितिहेतुः।** तथाहि- **स्वयमेव भूयोदर्शनेन यत्र यत्र धूमः तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र यत्र धूमः तत्र तत्राग्निरिति। तदनन्तरं**

**वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।**

**दीपिका-** तत्रेति उभयोर्मध्ये इत्यर्थः। स्वार्थानुमानं दर्शयति स्वयमेवेति। भूयोदर्शनेनेति। धूमाग्न्योर्व्याप्तिग्रहे साध्यसाधनयोर्भूतः सहचारदर्शने तदेतत्स्वार्थानुमानम्।

ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेऽपि वज्रमणौ व्यभिचारोपलब्धेर्भूयो दर्शनेन कथं व्याप्तिग्रह इति चेत्र, व्यभिचारज्ञानविरहसहकृत सहचारज्ञानस्य व्याप्तिग्राहकत्वात्। व्यभिचारज्ञानं द्विविधम्। निश्चयः शङ्का च। तद्विरहः क्वचित्तर्कात् क्वचित्स्वतसिद्धः एव। धूमाग्न्योर्व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्ग लक्षणस्तर्को व्यभिचारशङ्कानिवर्तकः। ननु सकलवह्निधूमत्वरूपसमान्यलक्षणप्रत्यासत्या सकलवह्निधूमज्ञानसम्भवात् । तस्मादिति लिङ्गपरामर्शादित्यर्थः ।

**व्याख्या-** स्वानुमितिहेतुत्वं स्वार्थानुमानस्य लक्षणम्। तथाहि कश्चित् भूयो दर्शनेन पुनः पुनः दर्शनेन यत्र धूमः तत्राग्निरिति महानसादौ व्याप्तिं गृह्णाति । ततः पर्वतसमीपं गतः। तत्र पर्वते अग्नौ सन्दिहानः धूमं पश्यति। सः व्याप्तिं स्मरति यत्र यत्र धूमः तत्र तत्र वह्निरिति। ततः

वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। अयमेव लिङ्परामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमान् इति अनुमितिज्ञानमुत्पद्यते। तदेतत् स्वार्वानुमानम् ।

ननु पार्थिवत्वस्य लोहलेख्यत्वस्य च शतशः सहचारदर्शनेऽपि वज्रमणौ व्यभिचारात् कथं व्याप्तिग्राहक इति चेन्न। व्यभिचारज्ञानविरहसहकृतसहकारज्ञानस्य व्याप्तिग्राहकत्वात् । व्यभिचारज्ञानं द्विविधम्। निश्चयः शङ्का चेति। तद्विरहः क्वचित् तर्कात् क्वचित् स्वतःसिद्धः एव। धूमाग्न्योः व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्गलक्षणः तर्कः। ननु सकलवह्निधूमयोः सन्निकर्षरहितत्वात् कथं व्याप्तिग्रह इति चेत्र, वह्नित्वधूमत्वरूप-सामान्यलक्षणप्रत्यासत्या सकलवह्निधूमज्ञानसम्भवात् ।

## परार्थानुमानम्

**तर्कसंग्रहः** - यत्तु स्वयं घूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा- पर्वतो वह्निमान्, घूमवत्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसः तथा चायं, तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।

**दीपिका-** परार्थानुमानमाह- यत्त्विति। यच्छब्दस्य तत्परार्थानुमानमिति तच्छब्देनान्वयः। पञ्चावयववाक्यमुदाहरति ।

### पुनरावृत्तिः(Recap)

- अनुमितिकरणमनुमानम् ।
- परामर्शजन्यं ज्ञानमनुमितिः ।
- अनुमानं द्विविधं स्वार्थं परार्थं च।
- तत्र स्वार्थं स्वानुमितिहेतुः। अयमेव लिङ्गपरामर्श इत्युच्यते।

### वस्तुनिष्ठप्रश्नाः(Objective type question)

1. अनुमानस्य लक्षणम् किम्?
2. यथार्थानुभवः कति विधः?
3. यथार्थानुभवस्य करणं कति विधम् ?
4. अनुमानं कतिविधम् ?
5. अनुमितिः का ?
6. स्वार्थानुमानस्य अपरनामं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. किं नाम व्याप्तिः?
2. अनुमानस्य भेदौ कौ?
3. पक्षधर्मतायाः लक्षणं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. किं नाम स्वार्थानुमानम् ?
2. परार्थानुमानस्य लक्षणम् किम् ?

## निर्दिष्टाभ्यासाः(Assignments)

1. अनुमानप्रमाणं विशदयत।
2. अनुमानस्य भेदं लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अनुमितिकरणमनुमानम् ।
2. चतुर्विधम्।
3. चतुर्विधम्।
4. द्विविधम् ।
5. परामर्शजन्यं ज्ञानमनुमितिः।
6. लिङ्गपरमर्शम्।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit– 2
# पञ्चावयवाः

## उद्देश्यानि (Learning Outcomes)

- अनुमानप्रमाणं तद्भेदानां चावगमनाय।
- पञ्चावयवानां ज्ञानम् अवगच्छन्ति।
- अनुमानप्रमाणस्वरूपम् अवगच्छन्ति।
- अनुमानप्रक्रियां जानन्ति।

## प्राग्व्यपेक्षाः(Prerequisites)

प्रमाणस्वरूपं ज्ञातम्। प्रत्यक्षप्रमाणं, तद्भेदश्च ज्ञायते। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्विविधम्- निर्विकल्पकं, सविकल्पकं चेति। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्।प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः- संयोगः, संयुक्तसमवायः, संयुक्तसमवेत- समवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च इति। यथार्थानुभवः चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्। अनुमितिः द्विधा। स्वार्थं परार्थम्। परार्थानुमित्यर्थं पञ्चावयवाः साहाय्यकाः। तान् पञ्चावयवान् पठामः।

## मुख्यपदानि(Keywords)

पञ्चावयवाः, विपक्षः, प्रतिज्ञा, हेतु, उदाहरणम्, उपनयः, निगमनम्।

## Discussion

**तर्कसंग्रहः - प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्वात् इति हेतुः। यो यो धूमवान् स स वह्निमान् यथा महानसः इत्युदाहरणम्। तथा चायम् इत्युपनयः। तस्मात्तथेति निगमनम्।**

**दीपिका-** अवयवस्वरूपमाह- प्रतिज्ञेति। उदाहृतवाक्येषु प्रतिज्ञादिविभागमाह- पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः। व्याप्तिप्रतिपादकं वचनमुदाहरणम्। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः। हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। पक्षज्ञानं प्रतिज्ञाप्रयोजनम्। लिङ्गज्ञानं हेतुप्रयोजनम्। व्याप्तिज्ञानमुदाहरणप्रयोजनम्। पक्षधर्मताज्ञानमुपनयप्रयोजनम्। अबाधित्वादिकं निगमनप्रयोजनम्।

**व्याख्या-** पक्षे साध्यस्य निर्देशः प्रतिज्ञा।

यथा- पर्वतो वह्निमान्। अत्र वह्निः साध्यः। साध्यो वह्निः पक्षे पर्वते अस्ति इति निर्देशः। प्रतिज्ञा वाक्ये पक्षः साध्यश्च स्तः। यत् साध्यते तत् साध्यम्। कुत्र साध्यते सः पक्षः। अनन्तरं हेतुः। पञ्चमीविभक्त्यन्तं लिङ्गप्रतिपादकं वाक्यं हेतुः।

यथा- धूमवत्वात् इति हेतुः। व्याप्तिप्रतिपादकं वचनम् उदाहरणम्।

यथा - यो यो धूमवान् स स वह्निमान् यथा महानसः इति वाक्यम् उदाहरणम्।

व्याप्तिविशिष्टलिङ्ग (हेतु) प्रतिपादकं वचनम् उपनयः।

यथा- तथा चायमिति। पक्षे साध्यस्य हेतोः च अस्तित्वप्रतिपादकवचनं निगमनम्।

यथा- तस्मात्तथा इति।

**तर्कसंग्रहः- स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्ग परामर्शोऽनुमानम्।**

**दीपिका-** अनुमितिकरणमाह स्वार्थेति। ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्याम् एवानुमितिसम्भवे व्याप्तिविशिष्टलिङ्गपरामर्शः किमर्थमङ्गीकर्तव्य इति चेन्न,

वह्निव्याप्यधूमवानयमिति शब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात्। लिङ्गं न करणम्- अतीतानागतादौ व्यभिचारात्। व्यापारवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिज्ञानं करणम्। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः। अनुमानमुपसंहरति तस्मादिति।

**व्याख्या-** व्याप्तिस्मरणेन पक्षधर्मताज्ञानेन च अनुमितिज्ञानसम्भवे किमर्थ व्याप्तिविशिष्टा-लिङ्ङ्गपरामर्शः इति चेन्न। वह्निव्याप्यधूमवानयमिति इति शब्दबोधपरामर्शस्थले परामर्शस्यावश्यकतया, सर्वत्र परामर्शस्य कारणत्वे लाघवम्।

## पुनरावृत्तिः (Recap)

- प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः।
- पर्वतो वह्निमानिति प्रतिज्ञा। साध्यवत्तया पक्षवचनं प्रतिज्ञा।
- धूमवत्त्वादिति हेतुः। पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः।
- यो यो धूमवान् स स वह्निमानित्युदाहरणम्। व्याप्तिप्रतिपादनं वचनमुदाहरणम्।
- तथा चायमित्युपनयः। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः।
- तस्मात्तथेति निगमनम्। हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्।
- पक्षज्ञानं पतिज्ञाप्रयोजनम्। लिङ्गज्ञानं हेतुप्रयोजनम्। व्याप्तिज्ञानमुदाहरण प्रयोजनम्। पक्षधर्मताज्ञानम् उपनयप्रयोजनम्। अबाधितत्वादिकं निगमनप्रयोजनम्।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. स्वार्थानुमितिपरार्थानुमित्योः किं करणम् ?
2. पश्चावयवाः के?

3. पञ्चमीविभक्त्यन्तं लिङ्गप्रतिपादकं वाक्यं---- ।

4. व्याप्तिविशिष्टलिङ्ग(हेतु) प्रतिपादकं वचनम् -------।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. प्रतिज्ञा नाम किम्?
2. हेतुः नाम किम्?
3. उदाहरणं नाम किम्?
4. उपनयं नाम किम्?
5. निगमनं नाम किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. पञ्चावयवाः लिखत।
2. स्वार्थानुमितिपरार्थानुमित्योः कारणम् किम्?

## निर्दिष्टाभ्यासाः(Assignments)

1. अनुमानप्रमाणं विशदयत।
2. परामर्शस्य स्वरूपं विशदयत।
3. अनुमानस्य भेदं लिखत।
4. पञ्चावयवाः के ? लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. लिङ्गपरामर्शः।
2. प्रतिज्ञा, हेतु, उदाहरणं, उपनयं, निगमनानि।
3. हेतुः।
4. उपनयः

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थौ (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit-3

# लिङ्गम् - तद्भेदाश्च

## उद्देश्यानि(Learning Outcomes)

- तर्कसंग्रहस्य सामान्यज्ञानं सम्पादयति ।
- अनुमानप्रमाणं तद्भेदानां च अवगमनाय।
- लिङ्गं लिङ्गभेदान्च पठामः।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः,

स्मृतिः,अनुभवः, प्रत्यक्षादिभेदान्, प्रत्यक्षप्रमाणम् इत्यादिकं सलक्षणोदाहरणम् अस्माभिः पठितम्। पुनः अनुमानप्रमाणं पठितुमवसरः जातः। अनुमानप्रमाणे परामर्शं, व्याप्तिः, पक्षधर्मता अनुमानस्य भेदाः, इत्यादि विषयाः प्रतिपाद्यन्ते ।

## मुख्यपदानि(Key words)

लिङ्गं, अन्वययव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि, पक्षः, सपक्षः, विपक्षः, महाह्रदः।

## Discussion

**लिङ्गं कतिविधं, किञ्चान्वयव्यतिरेकिलक्षणम् ?**

**तर्कसंग्रहः- लिङ्गं त्रिविधम्- अन्वययव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि।**

**यथा - वह्नौ साध्ये धूमत्वम्। यत्र धूमः तत्राग्निः यथा महानस इत्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा हृद इति व्यतिरेकव्याप्तिः।**

**दीपिका-** लिङ्गं विभजते- लिङ्गमिति। अन्वयव्यतिरेकिणं लक्षयति- अन्वयेनेति। हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः । तदभावयोर्व्याप्तिः व्यतिरेकव्याप्तिः।

**केवलान्वयिनः किं लक्षणम्?**

**तर्कसंग्रहः- अन्वयमात्रव्याप्तिकं केवलान्वयि ।**

**यथा- घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिः नास्ति। सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।**

**दीपिका-** केवलान्वयिनो लक्षणमाह- अन्वयेति। केवलान्वयिसाध्यकं लिङ्गं केवलान्वयि। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्।

केवलान्वयिनमुदाहरति- यथा- घटोऽभिधेयः प्रमेयत्वादिति। ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ।

**केवलव्यतिरेकिणः किं लक्षणम् ?**

**तर्कसंग्रहः- व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि।**

**यथा - पृथिवीतरेभ्यो भिद्यते गन्धत्वात्, यदितरेभ्यो न भिद्यते न तद् गन्धवत्, यथा- जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यत् गन्धवत् तदिरभिन्नमिति अन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् ।**

**दीपिका-** केवलव्यतिरेकिणो लक्षणमाह- व्यतिरेकीति। तदुदाहरति- पृथिवीति ननु इतरभेदः प्रसिद्धो वा न वा? आद्ये यत्र प्रसिद्धिस्तत्र हेतुसत्वेऽन्वयित्वम्। असत्वेऽसाधारण्यम्। द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः। विशेषेण ज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेत्र। जलादित्रयोदशान्योन्याभावानां त्रयोदशासु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते। त्रयोदशत्वावच्छिन्न भेदात्पक्षसाध्यस्यैकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्ये, प्रत्येकाधिकरणप्रसिद्ध्या

साध्यविशिष्टानुमितिः साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्ति निरूपणं चेति।

**व्याख्या-** व्याप्तिः- हेतोः धर्मः व्याप्तिः। व्याप्तिः द्विविधा अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः च।

हेतुसाध्ययोः व्याप्तिः अन्वयव्याप्तिः। यत्र हेतुः तत्र साध्यः इति व्याप्तिः ।

यथा- यत्र धूमः तत्र वह्निः यथा महानस इति।

साध्यभावहेत्वभावयोः व्याप्तिः व्यतिरेकव्याप्तिः। यत्र साध्यः नास्ति तत्र हेतुरपि नास्ति इति व्याप्तिः।

यथा- यत्र वह्निः नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति।

## लिङ्गम्।

लीनमप्रत्यक्षमर्थं गमयति बोधयति इति लिङ्गम्। लिङ्गम् त्रिविधम्। अन्वयव्यतिरेकि-लिङ्गम्, केवलान्वयिलिङ्गम्, केवलव्यतिरेकिलिङ्गञ्चेति ।

### अन्वयवव्यतिरेकि

**यस्य हेतोः अन्वयव्याप्तिः व्यतिरेकव्याप्तिः च स हेतुः अन्वयव्यतिरेकिलिङ्गम्।**

यथा- वह्नौ साध्ये धूमत्वात् इति हेतुः। यथा- यत्र यत्रधूमः तत्र तत्र वह्निः यथा महानस इति अन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यचा ह्रदः इति व्यतिरेकव्याप्तिः। अत्र धूमत्वात् इति हेतोः अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्च स्तः। अतः धूमत्वात् इति हेतुः अन्वयव्यतिरेकिलिङ्गस्य उदाहरणम्।

## केवलान्ययि

**यस्य हेतोः अन्वयव्याप्तिमात्रं स्यात् स हेतुः केवलान्वयिलिङ्गम्।**

यथा- घटः अभिधेयः प्रमेयत्वात् पटवत्। यत्राभिधेयत्वं तत्र प्रमेयत्वम् इति प्रमेयत्वस्य अन्वयव्याप्तिः। किन्तु प्रमेयात्वाभिधेयत्त्वयोः व्यतिरेकव्याप्तिः नास्ति। सर्वस्यापि प्रमेयत्वादभिधेयत्वात् च।

### केवलव्यतिरेकि

यस्य हेतोः व्यतिरेकव्याप्तिमात्रं स्यात् स हेतुः केवलव्यतिरेकिलिङ्गम् ।

यथा- पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात्, तदितरेभ्यो न भिद्यते न तद् गन्धवत् तद् इतरभिन्नम् इति अन्वयव्याप्तेः दृष्टान्तो नास्ति । पृथिवीमात्रस्य पक्षत्वात्।

**पक्षः।**

**पक्षस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- सन्दिग्धसाध्यवान् पक्षः ।**

**यथा- धूमत्वे हेतौ पर्वतः ।**

**दीपिका-** पक्षलक्षणमाह- सन्दिग्धेति। ननु श्रवणानन्तरभाविमननस्थलेऽतिव्याप्तिः, तत्र वेदवाक्यैरात्मनो निश्चिततत्वेन सन्देहाभावात्, किञ्च प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमिति-स्तत्राप्यव्याप्तिरिति चेत्र। उक्तपक्षताश्रयत्वस्य पक्षलक्षणात्वात्।

**सपक्षस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः - निश्चितसाध्यवान् सपक्षः ।**

**यथा- तत्रैव महानसः।**

**दीपिका-** सपक्षलक्षणमाह- निश्चितेति।

**व्याख्या-** निश्चितसाध्यवत्वं सपक्षस्य लक्षणम्। यथा- यत्र धूमः तत्र वह्निः यथा महानसः इत्यत्र महानसः सपक्षः।

**विपक्षस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- निश्चितसाध्याभावान् विपक्षः ।**

**यथा- तत्रैव महाह्रदः।**

**दीपिका-** विपक्षलक्षणमाह- निश्चितेति।

**व्याख्या-** निश्चितसाध्याभाववत्वं विपक्षस्य लक्षणम्।

यथा- वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः इत्यत्र महाह्रदः विपक्षः।

## पुनरावृत्तिः(Recap)

- लिङ्गं त्रिविधम्- अन्वयव्यतिरेकि- केवलान्वयि- केवलव्यतिरेकि चेति।
- अन्वयेन व्यतिरेकेण च व्याप्तिमत्अन्वयव्यतिरेकि।
- अन्वयमात्रव्याप्तिकं केवलान्वयि।
- व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि।
- सन्दिग्धसाध्यवान् पक्षः।
- निश्चितसाध्यवान् सपक्षः।
- निश्चित साध्याऽभाववान् विपक्षः।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. लिङ्गं कतिविधं ?
2. अन्वयमात्रव्याप्तिकं --। (रिक्तं पूरयत)
3. व्यतिरेकमात्रव्याप्तिकं --।(रिक्तं पूरयत)
4. पक्षस्य किं लक्षणम् ?
5. स पक्षस्य लक्षणं किम्?
6. विपक्षस्य लक्षणं किम्?
7. निश्चितसाध्यवान् --। (रिक्तं पूरयत)
8. निश्चितसाध्याऽभाववान् --।(रिक्तं पूरयत)

SGOU

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. अन्वयव्यतिरेकि लक्षणम् किम्?
2. केवलान्वयिनः लक्षणम् किम्?
3. केवलव्यतिरेकिणः लक्षणम् किम्?

## एकैकया खण्डिकयाउत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. लिङ्गं कति विधम् ? विशदयत।
2. पक्ष-सपक्ष-विपक्ष स्वरूपं निरूपयत।

## निर्दिष्टाभ्यासाः(Assignments)

1. लिङ्गं सोदाहरणं प्रतिपादयत।
2. पक्ष-सपक्ष-विपक्ष स्वरूपं निरूपयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. त्रिविधम्।
2. केवलान्वयि।
3. केवलव्यतिरेकि।
4. सन्दिग्धसाध्यवान् पक्षः ।
5. निश्चितसाध्यवान् सपक्षः ।
6. निश्चितसाध्याभावान् विपक्षः ।

7. सपक्षः।

8. विपक्षः

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahityaAcademy,Thrissur

# Unit -4
# हेत्वाभासाः

## उद्देश्यानि(Learning Outcomes)

- तर्कसंग्रहस्य सामान्यज्ञानं अवबोधयते ।
- अनुमानप्रमाणं तद्भेदानां चावगमनाय।
- हेत्वाभासानां अवबोधाय।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः,

स्मृतिः, अनुभवः, प्रत्यक्षादिभेदान्, प्रत्यक्षप्रमाणम् इत्यादिकं सलक्षणोदाहरणम् अस्माभिः पठितम्। पुनः अनुमानप्रमाणं पठितुमवसरः जातः।अनुमानप्रमाणे परामर्शं, व्याप्तिः, पक्षधर्मता अनुमानस्य भेदाः , पञ्चावयवाः,हेत्वाभासाः इत्यादि विषयाः प्रतिपाद्यन्ते ।

## मुख्यपदानि (Key words)

हेत्वाभासः, सव्यभिचारः, विरुद्धः, सत्प्रतिपक्षः, असिद्धः, बाधितः, साधारणम्,असाधारणम्, अनुपसंहारि, आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धः।

## Discussion

### हेत्वाभासः।

अनुमितिप्रतिबन्धक यथार्थज्ञानविषयत्वं हेत्वाभासत्वम्। हेतुवदाभासन्ते इति हेत्वाभासाः। दुष्टहेतवः इत्यर्थः। हेत्वाभासाः पञ्च।

हेत्वाभासाः के ?

**तर्कसंङ्ग्रहः- सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।**

**दीपिका-** एवं सद्धेतुनिरूप्याद्हेतून् (हेत्वाभासान्) निरूपयितुं विभजते- **सव्यभिचारेति।** अनुमितिप्रतिबन्धकतथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।

हेत्वाभासाः पञ्च। सव्यभिचारः, विरुद्धः सत्प्रतिपक्षः, असिद्धः बाधितः चेति।

## सव्यभिचारः।

**सव्यभिचारस्य लक्षणं किं, कतिविधश्च सः ?**

**तर्कसंङ्ग्रहः- सव्यभिचारोऽनैकान्तिकः। स त्रिविधः- साधारणासाधारणानुपसंहारिभेदात् ।**

**दीपिका-** सव्यभिचारं विभजते- स त्रिविधः इति। साधारणम्,असाधारणम्, अनुपसंहारि च।

**साधारणस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- तत्र साध्याभाववद्वृत्तिः साधारणोऽनेकान्तिकः।**

**यथा- पर्वतो वह्निमान् प्रमेयत्वादिति। तत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।**

**दीपिका-** साधारणं लक्षयति तत्रेति। उदाहरति तथेति।

**असाधारणस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- सर्वसपक्षविपक्षव्यापृत्तः पक्षमात्रवृत्तिरसाधारणः।**

**यथा- शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।**

**दीपिका-** असाधारणं लक्षयति- सर्वेति।

**अनुपसंहारिणः किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारि ।**

**यथा- सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ।**

**दीपिका-** अनुपसंहारिणो लक्षणमाह- अन्वयेति।

**व्याख्या-** अनैकान्तिकत्वं सव्यभिचारस्य लक्षणम्। न एकान्तिकः अनेकान्तिकः। एकान्ते साध्यवति न वर्तते इति अनैकान्तिकः। अनैकान्तिकः सव्यभिचारः। सव्यभिचारः त्रिविधः। साधारणसव्यभिचारः, असाधारणसव्यभिचारः अनुपसंहारिसव्यभिचारः चेति।

साध्याभाववद्वृत्तित्वं साधारणसव्यभिचारस्य लक्षणम्।

यथा- **पर्वतो वह्निमान् प्रमेयत्वात्** इति। अत्र हेतुः प्रमेयत्वात् साध्याभाववति वह्न्यभाववति ह्रदे विद्यते। अतः प्रमेयत्वात् इति हेतुः साधारणसव्यभिचारः।

सर्वपक्षविपक्षव्यावृत्तत्वे सति पक्षमात्रवृत्तित्वं असाधारणसव्यभिचारस्य लक्षणम्।

यथा- शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दत्वात् इति हेतुः। अत्र शब्दत्वं हि सर्वेभ्यो नित्येभ्यो अनित्येभ्यश्च व्यावृतं पक्षे शब्दे एव वर्तते।

अन्वयव्यतिरेकदृष्टान्तरहितत्वम् अनुपसंहारिणः लक्षणम्।

यथा- सर्वमनित्यं प्रमेयत्वात् इत्यत्र प्रमेयत्यात् इति हेतुः। वाक्येऽस्मिन् सर्वस्य पक्षत्वात् अन्वयव्याप्तेः व्यतिरेकव्याप्तेः च दृष्टान्तो नास्ति। अतः प्रमेयत्वात् इति हेतुः अनुपसंहारि।

**विरुद्धः।**

**विरुद्धस्य किं लक्षणम्**

**तर्कसंङ्ग्रहः- साध्याभावव्याप्तो हेतुः विरुद्धः।**

**यथा- शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।**

**दीपिका-** विरुद्धं लक्षयति- साध्येति।

**व्याख्या-** साध्याभावाव्याप्तेः हेतुः विरुद्धः।

यथा- **शब्दो नित्यः कृतकत्वात्** इत्यत्र **कृतकत्वात्** इति हेतुः। कृतकत्वात् जन्यत्वात् इत्यर्थः। अत्र कृतकत्वं साध्याभावेन **नित्यत्वाभावेन अनित्यत्वेन** व्याप्तम्। अतः कृतकत्वात् विरुद्धः।

**सत्प्रतिपक्षः।**

**सत्प्रतिपक्षस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः -यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः।**

**यथा- राब्दो नित्यः श्रवणात्वात् शब्दत्ववत्। शब्दो अनित्यः कार्यत्वात् घटवत् इति।**

**दीपिका-** सत्प्रतिपक्षं लक्षयति- यस्येति।

**व्याख्या** -साध्यस्य अभावसाधकार्थं अन्तरम् अन्यो हेतुः विद्यते चेत् प्रथमहेतुः सत्प्रतिपक्षः।

उदा- शब्दो नित्यः श्रवणत्वात् शब्दत्ववत् इत्यत्र साध्य नित्यः श्रवणत्वात् हेतुः शब्दत्ववत् उदाहरणम् शब्दः पक्षः। शब्दोऽनित्यः कार्यत्वात् घटवत् इत्यत्र अनित्यः इति प्रथमवाक्यसाध्यस्यनित्यस्य अभावः। तदनित्यस्य साधकाय कार्यत्वात् इति हेत्वन्तरमस्ति । अतः श्रवणत्वात् इति हेतुः सत्प्रतिपक्षः ।

## असिद्धः।

**असिद्धः कतिविधः ?**

**तर्कसंङ्ग्रहः- असिद्धः त्रिविधः। आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति ।**

**दीपिका-** असिद्धं विभजते- असिद्ध इति।

## आश्रयासिद्धः।

**आश्रयासिद्धः कः ?**

**तर्कसंङ्ग्रहः- आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव ।**

**दीपिका-** आश्रयासिद्धमुदाहरति- गगनेति।

**व्याख्या-** यस्य हेतोः आश्रयः पक्षः नास्ति स हेतुः आश्रयसिद्धः ।

यथा- गगनारविन्दं सुरभि अरविन्दत्वात्, सरोजारविन्दवत् इत्यत्र अरविन्दत्वात् इति हेतुः।

अत्र गगनारविन्दं पक्षः स आश्रयः असिद्धः। अतः अरविन्दत्वात् इति हेतुः आश्रयासिद्धः ।

## स्वरूपासिद्धः।

**स्वरूपासिद्धस्य किं रूपम् ?**

**तर्कसंङ्ग्रहः- स्वरूपसिद्धो यथा- शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रवणत्वात्।**

**दीपिका-** स्वरूपसिद्धमुदाहरति- शब्देति।

**व्याख्या-** यः हेतुः पक्षे नास्ति स हेतुः स्वरूपासिद्धः। स्वरूपस्य असिद्धत्वात् स्वरूपासिद्धः। यथा- शब्दः गुणः चाक्षुषत्वात् इत्यत्र चाक्षुषत्वात् इति हेतु पक्षे शब्दे नास्ति शब्दस्य श्रवणत्वात् ।

## व्याप्यत्वासिद्धः।

व्याप्यत्वासिद्धः कः, किञ्चोपाधिस्वरूपम् ?

**तर्कसंङ्ग्रहः- सोपाधिको हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधित्वम्। साध्यसमानाधिकरणात्यन्ताभावऽप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवत् निष्ठाऽत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् ।**

**यथा- पर्वतो धूमवान् वह्निमत्वात् इत्यत्र आर्द्रेन्धनसंयोग इति साध्यव्यापकत्वम्। यन्न वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाऽव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोगः उपाधिः। सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धम् ।**

**दीपिका-** व्याप्यत्वासिद्धस्य लक्षणमाह- सोपाधिक इति। उपाधेर्लक्षणमाह- साध्येति।

उपाधिश्चतुर्विधः। केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्न साध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति ।

आद्यः, आर्द्रेन्धनसंयोगः।

द्वितीयो यथा- वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र बहिर्द्रव्यतावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्वम्।

तृतीयो यथा- प्रध्वंसो विनाशो जन्यत्वादित्यत्र जन्यत्वावाच्छिन्ननित्यत्वव्यापकं भावत्वम्।

चतुर्थो यथा- प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यपकत्वं भावत्वम्।

**व्याख्या-** सोपाधित्वे सति हेतुत्वं व्याप्यत्वसिद्धस्य लक्षणम्। साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। यथा- पर्वतो धूमवान् बहिनमत्वात् इत्यत्र साध्यो धूमः साध्यसमानाधिकरणं पर्वतः साध्यसमानाधिकरणात्यन्ताभावः घटात्यन्ताभावः, घटात्यन्ताभावस्य प्रतियोगी घटः अप्रतियोगी आर्द्रेन्धनसंयोगः इति। आर्द्रेन्धनसंयोगस्य साध्यव्यापकत्वम्। साधनो वह्निः साधनवन्निष्ठात्यन्ताभावः आर्द्रेन्धनसंयोगाभावः (तप्तायोगोलके वह्निः अस्ति)। आर्द्रेन्धनसंयोगाभावस्य प्रतियोगी आर्द्रेन्धनसंयोगः इति आर्द्रेन्धनसंयोगस्य साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् आर्द्रेन्धनसंयोगः उपाधिः। उपाधिसहितत्वात् वह्निमत्वात् इति हेतुः व्याप्यत्वासिद्धः ।

## बाधितः।

**बाधितस्य किं लक्षणम् ?**

**तर्कसंङ्ग्रहः- यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः।**

**यथा-वह्निरनुष्णो द्रव्यत्वादिति। अत्र अनुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम्।**

**दीपिका-** बाधितस्य लक्षणमाह- यस्येति। अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वम्। इतरेषां तु परामर्शप्रतिबन्धकत्वम्। तत्रापि साधारणस्याव्यभिचाराभाववत्तया, विरुद्धस्य सामानाधिकरण्याभाववत्तया, व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तया असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेन च व्याप्तिज्ञानप्राप्तिबन्धकत्वम्। आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबन्धकत्वम्। उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः। सिद्धसाधनं तु पक्षताविघटकतयाऽश्रयासिद्धौ अन्तर्भवतीति प्राञ्चः, निग्रहस्थानान्तरमिति नवीनाः।

**व्याख्या-** यस्य साध्यस्य अभावः प्रमाणान्तरेण निश्चितः सः बाधितः ।

यथा- वह्निः अनुष्णः द्रव्यत्वादित्यत्र द्रव्यत्वात् इति हेतुः । अत्र अनुष्णत्वं साध्यं साध्याभावः उष्णत्वं तदुष्णत्वं स्पर्शनप्रत्यक्षप्रमाणेन इति प्रमाणान्तरेण गृह्यते। अतः द्रव्यत्वादिति हेतुः बाधितः। इति हेत्वाभासो समाप्तः।

## पुनरावृत्तिः(Recap)

- हेतुवदाभासन्ते इति हेत्वाभासाः। दुष्टहेतवः इत्यर्थः।
- हेत्वाभासाः पञ्च- सव्यभिचारः, विरुद्धः सत्प्रतिपक्षः, असिद्धः बाधितः चेति।
- सव्यभिचारः त्रिविधः- साधारणासाधारणानुपसंहारिभेदात् ।
- सर्वसपक्षविपक्षव्यापृत्तः पक्षमात्रवृत्तिरसाधारणः ।
- अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारि ।
- साध्याभावव्याप्तो हेतुः विरुद्धः ।
- यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रत्पक्षः।
- असिद्धः त्रिविधः- आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति
- सोपाधिको हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधित्वम्।
- यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः ।

## वस्तुनिष्ठप्रश्नाः(Objective type question)

1. हेत्वाभासाः कति विधः?
2. सव्यभिचारः कति विधः?
3. सव्यभिचारः-- ।
4. असिद्धाः कति ? के ते ?

5. व्याप्यत्वासिद्धः कः ?
6. विरुद्धस्य लक्षणं किम् ?
7. साध्याभावव्याप्तो हेतुः ---- ।
8. सोपाधिको हेतुः --------।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. साधारणस्य लक्षणं किम् ?
2. हेत्वाभासाः के?
3. अनुपसंहारि नाम किम् ?
4. असाधारणसव्यभिचारस्य लक्षणं किम् ?
5. अनुपसंहारिणः किं लक्षणम् ?
6. सत्प्रतिपक्षस्य किं लक्षणम् ?
7. आश्रयासिद्धः कः ?
8. स्वरूपासिद्धस्य लक्षणं किम्?
9. व्याप्यत्वासिद्धस्य उपाधिस्वरूपं किम्?
10. बाधितः कः ?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

1. सत्प्रतिपक्षः लघुखण्डिकया लिखत।
2. व्याप्यत्वासिद्धः कः, किं च उपाधिस्वरूपम्?

## निर्दिष्टाभ्यासाः(Assignments)

1. हेत्वाभासं विशदयत
2. असिद्धं प्रतिपादयत।
3. बाधितस्य लक्षणं निरूपयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि(Answer to Objective type questions)

1. पञ्च ।
2. त्रिविधः।
3. अनैकान्तिकः।
4. असिद्धः त्रिविधः- आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति
5. सोपाधिको हेतुः व्याप्यत्वासिद्धः।
6. साध्याभावव्याप्तो हेतुः विरुद्धः ।
7. विरुद्धः।
8. व्याप्यत्वासिद्धः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर, ए पोर्ट हिस्टरि ओफ सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८
3. अन्नम्भटः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः(Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr.V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur


SGOU

BLOCK -6

# शब्दोपमानौ

SGOU

# Unit 1
# उपमानम्

## उद्देश्यानि(Learning Outcomes)

- न्यायवैशेषिकदर्शने परिचाययति।
- न्यायदर्शनस्य ग्रन्थशैलीं परिचयः।
- प्रमाणानां स्वरूपज्ञानम्।
- उपमानप्रमाणस्य परिचयः।

## प्राग्व्यपेक्षाः(Pre requisites)

हे पठितारः,

बुद्धेः लक्षणं, कारणत्रैविध्यं, प्रत्यक्षप्रमाणम्, अनुमानं, हेत्वाभासादिकम् अस्माभिः पठितं खलु। ततः उपमानशब्दप्रमाणं अयथार्थानुभवादिकं पठामस्तावत् ।

## मुख्यपदानि(Key words)

उपमानम्, उपमितिः, शक्तिः, लक्षणा, वाक्यार्थज्ञानहेतुः, अयथार्थानुभवः, वाक्यम्, सुखम्, दुःखम्, कर्मसंस्कारः, अभावः।

## Discussion

### अथ उपमानम्,

**तर्कसंङ्ग्रहः-उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्य ज्ञानम् । तथाहि- कश्चिद्गवयशब्दवाच्यमजानन् कुताश्चिदारण्यकपुरुषाद् गो सदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरम् अयं गवयशब्दवाच्यः इत्युपमितिरुत्पद्यते ।**

**दीपिका-** उपमानं लक्षयति- उपमितीति इत्युपमानम् ।

**व्याख्या-** उपमितिज्ञानकरणत्वं उपमानस्य लक्षणम्। **संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः** इति । तत्करणं सादृश्यज्ञानम्। तथाहि- गवयशब्दवाच्यमजानन् कश्चित् पुरुषः कुतश्चित् वनपुरुषात् गोसदृशः गवयः इति शृणोति । ततः वनं गतः । तत्र गोसादृशं पिण्डं पश्यति। गोसदृशो गवयः इति वाक्यार्थं स्मरति। तदनन्तरं तस्य अयं गवयशब्दवाच्यः इति उपमितिः उत्पद्यते। उपमितिकरणम् उपमानम्।

उपमानं लक्षयति- उपमितिकरणमिति। उपमितिं लक्षयति संज्ञासंज्ञीति। संज्ञा नाम पदम्। संज्ञि नाम अर्थः। तयोः सम्बन्धः शक्तिः। तथा च पदपदार्थसम्बन्धज्ञानम् उपमितिरित्यर्थः। उपमानं नाम अतिदेशवाक्यार्थज्ञानम्। अतिदेशवाक्यार्थस्मरणव्यापारः। उपमिति फलम्। **गोसदृशो गवयपदवाच्य इत्याकारकवाक्याद् गोसदृशावच्छिन्न विशेष्यक गवयपदवाच्यत्वप्रकारेण यज्ज्ञानं जायते, तदेव करणम् ।**

**नीलकण्ठकृतायां** तर्कसंङ्ग्रहदीपिकाप्रकाशे उपमानस्य व्याख्या लक्षयतीति- अवसरसङ्गत्योपमानं निरूपयतीत्यर्थः। उपमितिः स्वरूपं व्युत्पादयति-मूले संज्ञोति। संज्ञा गवयपदम्, संज्ञी गवयः, तयोः संबन्धः शक्तिः, तज्ज्ञानमित्यर्थः। लक्षणं तु उपमिनोमि इत्यनुव्यवसायगम्योपमितित्वमेव। वाक्यार्थं स्मरन्गोसदृशं पिण्डं पश्यतीति। एतेन स्मरणं सादृश्यदर्शनजन्यमुद्बोधकान्तरजन्ये वा। उभयमपि सादृश्यदर्शनसहकारि, न तु सादृश्यदर्शनजन्यमेव स्मरणं सहकारीति सूचितम्। प्रास्वस्तु 'वाक्यार्थं स्मरन्' इत्यत्र वर्तमानसामीप्ये प्रत्ययः। वाक्यार्थं स्मरिष्यामित्यर्थः। एवं च वाक्यार्थस्मरणस्य सादृश्यदर्शन जन्यतालाभेन व्यापारतालाभ इत्याहुः। तदनन्तरमित्यादि। सादृश्यदर्शनानन्तरम्। गवयो गवयपदवाच्य इत्याकारिका गवयत्वरूपलघुधर्मधर्मितावच्छेदकोपमितिरुत्पद्यत इत्यर्थः। इदमुपलक्षणम्। वैधर्म्यदर्शनेनप्युपमितिरिति ध्येयम्। वैशेषिकास्तु- पदवाच्यत्व व्याप्यसादृश्यादिपरामर्शात्पदवाच्यत्वस्य अनुमितिरेव, अतो नोपमानं प्रमाणान्तरमित्याहुः। तच्चिन्त्यम्। व्याप्तिज्ञानान्तरापि पदवाच्यत्वप्रमितेरनुभवसिद्धत्वात्।

रामरुद्रकृतायां दीपिकाव्यख्यायाम् उपमानं लक्षयति। मूले अवसरसङ्गत्या उपमानं निरूपयति- उपमितिकरणमिति। उपमितित्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वं उपमानस्य लक्षणम्। अतिदेशवाक्यार्थस्मरणात्मकव्यापारेऽतिव्याप्तिवारणाय कारणत्वमुपेक्ष्य करणत्वमुपात्तम्। व्यापारस्य व्यापारान्तरविरहेण अकरणत्वात् नातिव्याप्तिः, करणस्य इन्द्रियाघटितमूर्तिकत्वेन उपोद्घातसङ्गत्या उपमितिं लक्ष्यतीति। संज्ञेति। संज्ञा वाचकशब्दः संज्ञी वाच्यार्थः, तयोस्संबन्धः शक्तिः, सा च अस्माच्छब्दात् अयमर्थो बोद्धव्य इति ईश्वरेच्छारूपा, पदार्थान्तरं वेत्यन्यदेतत्, तद्विषयकं ज्ञानं उपमितिरित्यर्थः।

## पुनरावृत्तिः (Recap)

- चतुर्षु प्रमाणेषु तृतीयं भवति उपमान प्रमाणम्।
- उपमीयते इति उपमानम्।
- उपमानं नाम अतिदेशवाक्यार्थज्ञानम् ।
- उपमिति लक्षयति- संज्ञासंज्ञीति।
- संज्ञा नाम पदम्। संज्ञी नाम अर्थः । तयोः सम्बन्धः शक्तिः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. उपमानं नाम किम् ?
2. उपमितिः का?
3. उपमितेः करणं—।(रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. उपमानस्य लक्षणं किम् ?

## निर्दिष्टाभ्यासाः (Assignments)

1.उपमानप्रमाणं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. उपमितिकरणम् उपमानम् ।
2. संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः ।
3. सादृश्यज्ञानम्।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4


SGOU

# Unit–2
# शब्दप्रमाणम्

## उद्देश्यानि (Learning Outcomes)

- दर्शनविषयान् ग्रहिष्यति।
- न्यायवैशेषिकदर्शने परिचयः।
- न्यायदर्शनग्रन्थशैलीं परिचयः।
- प्रमाणानां सामान्यज्ञानम्।
- शब्दप्रमाणस्वरूपज्ञानम्।

## प्राग्व्यपेक्षाः(Prerequisites)

न्यायशास्त्रे चत्वारि प्रमाणानि सन्ति। प्रत्यक्षानुमानोपमानशब्दभेदात्। इन्द्रियार्थ सन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। अनुमितिकरणमनुमानम्। उपमितिकरणम् उपमानम्। प्रमाणेषु चतुर्थं भवति शब्दप्रमाणम्। आप्तवाक्यं शब्दः; आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः।

## मुख्यपदानि(Keywords)

शब्दः ,आप्तवाक्यं ,शक्तिः, जहल्लक्षणा, अजहल्लक्षणा, जहाजहलक्षणा आकाङ्क्षा , योग्यता , सन्निधिः, वाक्यार्थज्ञानं, वैदिकं, लौकिकं, शब्दज्ञानम् ।

## Discussion

### शब्दप्रमाणम्।

शब्दप्रमाणस्य किं स्वरूपम् ?

**तर्कसंग्रहः- आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः।**

**यथा- गामानयेति। शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।**

**दीपिका-** शब्दं लक्षयति- आप्तेति। पदलक्षणमाह- शक्तमिति। अर्थस्मृत्यनुकूलः पदपदार्थ-सम्बन्धः शक्तिः। सा च पदार्थान्तरमिति मीमांसकाः। तन्निरासार्थमाह अस्मादिति। डित्यादीनामिव घटादीनामपि एव शक्तिः न तु पदार्थान्तरमित्यर्थः।

ननु गवादिशब्दानां जातावेव शक्तिः। विशेषणतया जातेः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्त्वाक्षेपादिति केचित्। तन्न, गामानयेत्यादौ वृद्धव्यवहारेण सर्वत्रानयनादेः व्यक्तावेव सम्भवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात्।

शक्तिग्रहस्तु वृद्धव्यवहारेण। तथाहि व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्य श्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनक ज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमानय गां बधानेति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः। अश्वशब्दस्याश्वत्वविशिष्टे शक्तिः इति व्युत्पद्यते।

ननु सर्वत्र कार्यपरत्वात् व्यवहारस्य कार्यपरवाक्य एव व्युत्पत्तिः न सिद्धपर इति चेन्न काञ्च्यां त्रिभुवनतिलको भूपतिरास्ते इत्यादौ सिद्धेऽपि व्यवहारात्। विकसितपद्मे मधूनि पिबति मधुकरः इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेऽपि मधुकरादि पदे व्युत्पत्ति दर्शनाच्च ।

लक्षणापि शब्दवृत्तिः। शक्यसम्बन्धो लक्षणा। गङ्गायां घोष इत्यत्र गङ्गापदवाच्यप्रवाह- सम्बन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते। सैन्धवादौ लवणाश्वयोः परस्परसम्बन्धा भावान्नानाशक्तिकल्पनम्।

**लक्षणा त्रिविधा -**

जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। यत्र वाच्यार्थस्यान्वयाभावस्तत्र जहदिति। यथा मञ्चाः क्रोशन्ति इति। यत्र वाच्यार्थस्याप्यन्वयस्तत्राजहदिति ।
यथा- छत्रिणो गच्छन्तीति। यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहदिति ।

यथा- तत्त्वमसि इति। गौण्यपि लक्षणैव लक्ष्यमाणगुणसम्बन्धरूपा।

यथा- अग्निर्माणवक इति।

व्यञ्जनापि शक्तिलक्षणान्तर्भूता शब्दशक्तिमूला अर्थशक्तिमूला च अनुमानादिना अन्यथासिद्धा। तात्पर्यानुपपत्तिलक्षणाबीजम्। तत्प्रतीतिच्छयोच्चारितत्वं तात्पर्यम्। तात्पर्यज्ञानञ्च वाक्यार्थज्ञाने हेतुः नानार्थानुरोधात्। प्रकरणादिकं तात्पर्यग्राहकम्। द्वारमित्यादौ पिधेहि इति शब्दाध्याहारः। ननु अर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासम्भवादर्थाध्याहार एव युक्त इति चेन्न, पदविशेषजन्यपदार्थोपस्थितेः शब्दज्ञानहेतुत्वात्। अन्यथा घटः कर्मत्वम् आनयनं कृतिः इत्यत्रापि ज्ञानप्रसङ्गात् ।

पङ्कजादिपदेषु योगरूढिः। अवयवशक्तियोगः समुदायशक्ती रूढिः। नियतपद्मत्वादि ज्ञानार्थं शक्तिः। अन्यथा कुमुदोऽपि प्रयोगप्रसङ्गः। इतरान्विते शक्तिरिति प्राभाकराः। अन्वयस्य वाक्यार्थतया भानसम्भवादन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः।

**वाक्यार्थज्ञाने के हेतवः ?**

**तर्कसंग्रहः- आकांक्षा, योग्यता, सन्निधिश्च वाक्यार्थज्ञाने हेतुः। पदस्य पदान्तरव्यतिरेक - प्रयुक्तान्वयाननुभावकत्वमाकांक्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकांक्षादिरहितं वाक्यप्रमाणम्।**

**यथा - गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकांक्षाविरहात् । वह्निना सिञ्चेत् इति न प्रमाणम्। योग्यताविरहात्। प्रहरे प्रहरे सहोच्चारितानि गाम् आनय इत्यादि पदानि न प्रमाणम्। सान्निध्याभावात्।**

**दीपिका -** आकांक्षेति। आकांक्षादिज्ञानमित्यर्थः। अन्यथा आकांक्षादिभ्रमाच्छाब्दभ्रमो न स्यात्। आकांक्षां लक्षयति- पदस्येति।

योग्यतालक्षणमाह - अर्थेति। सन्निधिलक्षणमाह- पदानामिति। अविलम्बेन पदार्थोपस्थितिः सन्निधिः। उच्चारणं तु तदुपयोगितया उक्तम्। गौरश्व इति। घटः कर्मत्वमित्यप्यनाकांक्षोदाहरणं द्रष्टव्यम्।

**वाक्यं कतिविधम् ?**

**तर्कसंग्रहः - वाक्यं द्विविधम् । वैदिकं, लौकिकं च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकि तु आप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शब्दज्ञानम्। तत्करणं तु शब्दः।**

**दीपिका** - वाक्यं विभजते - वाक्यमिति। वैदिकस्य विशेषमाह- वैदिकमिति। ननु वेदस्यानादित्वात् कथमीश्वरोक्तत्वमिति चेन्न। वेदः पौरुषेयः वाक्यसमूहत्वात्। भारतादिवादित्यनुमानेन पौरुषेयत्वसिद्धेः न च स्मर्यमाणकर्तृकत्वमुपाधिः गौतमादिभिः शिष्यपरम्परया वेदेऽपि कर्तुः स्मर्यमाणत्वेन साधनव्यापकत्वात् । 'तस्मात् तपस्तपानात्त्रयो वेदा अजायन्त' इति श्रुतेः।

ननु वर्णा नित्याः 'स एवायं गकारः' इति प्रत्यभिज्ञाबलात्। तथा च कथं वेदस्यानित्यत्वमिति चेत् न। उत्पन्नो गकारो, नष्टो गकारः इत्यादि प्रतीत्या वर्णानामनित्यत्वात् सोऽयं गकारः इति प्रत्यभिज्ञायाः सेयं दीपज्वाला इतिवत् साजात्यावलम्बनत्वात्। वर्णानां नित्यत्वेऽप्यानुपूर्वी विशिष्टवाक्यस्यानित्यत्वात् तस्मादीश्वरोक्तो वेदः। मन्वादिस्मृतीनामाचाराणां च वेदमूलकतया प्रामाण्यम्। स्मृतिमूलवाक्यानामिदानीमध्ययनात् तन्मूलभूता काचित् शाखोच्छिन्नेति कल्प्यते।

ननु पाठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वादिति नित्यानुमेयो वेदो मूलमिति चेत् न। तथापि वर्णानुपूर्वी ज्ञानाभावेन बोधकत्वासम्भवात् ।

ननु एतानि पदानि स्मारितार्थसंसर्गवन्ति आकांक्षादिमत्पदकदम्बकत्वात् गामानय दण्डनेति मद्वाक्यवत् इत्यनुमानादेव संसर्गज्ञानसम्भवात् शब्दो न प्रमाणान्तरमिति चेत् न। अनुमितशब्दज्ञानस्य विलक्षणस्य शब्दात्प्रत्येमि इत्यनुव्यवसायसाक्षिकस्य सर्वसम्मतत्वात् ।

ननु अर्थापत्तिरपि प्रमाणान्तरमस्ति पीनो देवदत्तः दिवा न भुङ्क्ते इति दृष्टे पीनत्वान्यथानुपपत्या रात्रिभोजनमर्थापत्या कल्प्यत इति चेत् न। देवदत्तो रात्रौ भुङ्क्ते दिवाभुञ्जानत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् ।

शते पञ्चाशदिति सम्भवोऽप्यनुमानमेव। इह वटे यक्षस्तिष्ठति इत्यैतिह्यमपि आज्ञातमूलवक्तृकः शब्द एव। चेष्टापि शब्दानुमानद्वारा व्यवहारहेतुरपि न मानान्तरम्। तस्मात् प्रत्यक्षानुमानोपमानशब्दश्चत्वार्येव प्रमाणानि।

ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतोग्राह्यं परतो वेति विचार्यते। तत्र विप्रतिपत्तिः। ज्ञानप्रामाण्यं तदप्रामाण्यग्राहक- यावज्ज्ञानग्राहकसामग्रीग्राह्यम् न वा अत्र विधिकोटिः स्वतस्त्वम्। निषेधकोटिः परतस्त्वम् ।

अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं ज्ञानमप्रमा इति ज्ञानेन प्रामाण्याग्रहात् बाधवारणाय अप्रामाण्याग्राहकेति। इदं ज्ञानमप्रमा इति अनुव्यवसायनिष्ठ-प्रामाण्यग्राहकस्य अप्रमाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यादतः तदिति। तस्मिन् ग्राह्यप्रामाण्याश्रये अप्रमाण्यग्राहकेत्यर्थः। उदाहृतस्थले व्यवसाये अप्रामाण्यग्राहकस्याप्य-नुव्यवसाये तदग्राहकत्वात् स्वतस्त्वसिद्धिः।

ननु स्वत एव प्रामाण्यं गृह्यते घटमहं जानामि इत्यनुव्यवसायेन घटघटत्वयोरिव तत्सम्बन्धस्यापि विषयीकरणात् व्यवसायरूपप्रत्यासत्तेः तुल्यत्वात्। पुरोवर्तिनि प्रकारसम्बन्धस्यैव प्रमात्वपदार्थत्वादिति चेत् न। स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वा इत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात्। अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात्। तस्मात् स्वतोग्राह्यत्वाभावात् परतोग्राह्यत्वम् ।

यथाहि- प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवम्। यथा अप्रमा इति व्यतिरेकिण प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तज्जातीयत्वलिङ्गेनान्वयव्यतिरेकिणापि गृह्यते।

प्रमया गुणजन्यत्वमुत्पत्तौ परतस्त्वम्। प्रमासाधारणकारणं गुणः। अप्रमासाधारणकारणं दोषः। तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानम्। उपमितौ यथार्थसादृश्यज्ञानम्। शाब्दज्ञाने यथार्थयोग्यताज्ञानम्। इत्याद्यूहनीयम्। पुरोवर्तिनि प्रकारभावस्यानुव्यवसायेनानुपस्थितत्वात् प्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वमुत्पत्तौ परतस्त्वम् ।

ननु सर्वेषां ज्ञानानां यथार्थत्वात् अयथार्थज्ञानमेव नास्तीति। न च शुक्ताविदं रजतम् इनि ज्ञानात् प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यम्। रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्रवृत्तिसम्भवात् उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन नेदं रजतम् इत्यादौ अतिप्रसङ्गाभावादिति चेत् न सत्यरजतस्थले पुरोवर्ति विशेष्यकरजतप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् ।

## पुनरावृत्तिः (Recap)

- आप्तवाक्यं शब्दः; आप्तस्तु यथार्थवक्ता।
- वाक्यं पदसमूहः। शक्तं पदम्।
- अस्मात्पदादयमर्थो बोद्धव्यः इतीश्वरसंकेतः शक्तिः।
- लक्षणापि शब्दवृत्तिः।
- शक्यसम्बन्धः लक्षणा त्रिविधा।
- आकाङ्क्षायोग्यतासन्निधिश्च वाक्यार्थज्ञान हेतुः।
- वाक्यं द्विविधम् – वैदिकं,लौकिकं च।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. आप्तवाक्यं --------। (रिक्तं पूरयत)
2. आप्तः कः ?
3. वाक्यं -----।(रिक्तं पूरयत)
4. लक्षणा कति विधः ?का च ताः?
5. शक्यसम्बन्धो -----।(रिक्तं पूरयत)
6. वाक्यार्थज्ञाने हेतवः के?
7. अर्थाऽबाधो ----।(रिक्तं पूरयत)
8. वाक्यं कतिविधम् ? के च ते ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. शब्दप्रमाणस्य किं स्वरूपम् ?
2. शक्तिः नाम का?
3. आकाङ्क्षा नाम किम्
4. सन्निधिः नाम का?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the following questions in a paragraph**

1. वाक्यार्थज्ञाने हेतवः के?
2. वाक्यं कति विधम्? प्रतिपादयत।
3. त्रिविधा लक्षणा विशदयत।

## निर्दिष्टाभ्यासाः (Assignments)

1. वाक्यार्थज्ञाने के हेतवः ? विशदयत।
2. शब्दप्रमाणं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. शब्दः।
2. यथार्थवक्ता ।
3. पदसमूहः।
4. त्रिविधः। जहल्लक्षणा, अजहल्लक्षणा, जहदजहलक्षणा।
5. लक्षणा।
6. आकाङ्क्षा, योग्यता, सन्निधिः च।
7. योग्यता।
8. द्विविधम्। वैदिकं,लौकिकं च।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः (Suggested Readings)

1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.

# Unit- 3
# अयथार्थानुभवस्य तथा शिष्टगुणानां च परिचयः

## उद्देश्यानि (Learning Outcomes)

- न्यायवैशेषिकदर्शने परिचयः।
- न्यायदर्शनग्रन्थशैलीं परिचाययति।
- तर्कसंग्रहग्रन्थस्य परिचयः।
- अप्रमास्वरूपम् अवगच्छति।
- पञ्चकर्मणां परिचयः।

## प्राग्व्यपेक्षाः (Pre requisites)

तर्कशास्त्रे प्रथमम् उद्देशं वर्तते। नाम्ना पदार्थसङ्कीर्तनं द्रव्यगुणकर्मसामान्यविशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव। चतुर्विंशतिगुणाः। द्रव्यजातिमत्वं गुणवत्वं वा द्रव्यसामान्यलक्षणम्। सप्तपदार्थानां चतुर्विंशति गुणानां च सामान्यज्ञानम्। बुद्धिः द्विधा। स्मृतिः अनुभवः च। अनुभवे यथार्थानुभवः अयथार्थानुभवः चान्तर्भवन्ति। अस्मिन्नेकके अयथार्थानुभवभेदान् अवशिष्चगुणान् च विशदयति।

## मुख्यपदानि (Key words)

संशयः, विपर्यः, तर्कः, स्मृतिः, सुखं, दुःखं, धर्मं, अधर्मं, संस्कारः, ईश्वरः, जीवः, कर्मणः, वेगो, भावना, स्थितिस्थापकः।

## Discussion

**अयथार्थानुभवस्य कति भेदाः?**

**तर्कसंग्रहः- अयथार्थानुभव त्रिविधः। संशयविपर्ययतर्कभेदात्।**

**संशयस्य किं लक्षणम् ?**

**एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः। यथा- स्थाणुर्वा पुरुषो वेति।**

**विपर्ययः कः ?**

**मिथ्याज्ञानं विपर्ययः। यथा- शुक्तौ इदं रजतमिति।**

**तर्कस्य किं स्वरूपम् ?**

**व्याप्यारोपेण व्यापकारोपः तर्कः। यथा- यदि वह्निर्नस्यात् तर्हि धूमोऽपि न स्यादिति।**

**दीपिका-** अयथार्थानुभवं विभजते- अयथार्थ इति। स्वप्नस्य मानसविपर्ययरूपत्वात् न त्रैविध्यविरोधः।

संशयलक्षणमाह - एकेति । घटपटौ इति समूहालम्बनेऽतिव्याप्तिवारणाय एकेति। घटो द्रव्यमित्यादौ अतिव्याप्तिवारणाय विरुद्धेति । पटत्वविरुद्धघटत्वविरुद्धघटत्ववान् इत्यत्र अतिव्याप्तिवारणाय नानेति। विपर्ययलक्षणमाह मिथ्येति। तदभावतति तत्प्रकारकनिश्चयः इत्यर्थः।

तर्कलक्षणमाह- व्याप्तेति । यद्यपि तर्को विपर्ययेऽन्तर्भवति, तथापि प्रमाणानुग्रहत्वात् भेदेन कीर्तनम्

**व्याख्या-** तदभाववति तत्प्रकारकोऽनुभवः अयथार्थानुभवः। सः त्रिविधः। संशयः, विपर्ययः तर्कः इति भेदात्। लक्षणोदाहरणानि दत्तमस्ति।

**स्मृतिः कतिविधा ?**

**तर्कसंग्रहः- स्मृतिरपि द्विधा। यथार्थाऽयथार्था चेति। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था।**

**दीपिका-** स्मृतिं विभजते स्मृतिरिति ।

**व्याख्या-** संस्कारमात्रजन्यत्वे सति ज्ञानत्वं स्मृतेः लक्षणम्। यथार्था स्मृतिः अयथार्था स्मृतिः चेति स्मृतिः द्विविधा।

**सुखस्य किं लक्षणम् ?**

**तर्कसंग्रहः - सर्वेषामनुकूलतया वेदनीयं सुखम्।**

**दुःखस्य किं लक्षणम् ?**

**तर्कसंग्रहः- प्रतिकूलतया वेदनीयं दुःखम् ।**

**इच्छाद्वेषप्रयत्नानां कानि लक्षणानि ?**

**तर्कसंग्रहः- इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः।**

**धर्मस्य अधर्मस्य च किं लक्षणम् ?**

**तर्कसंग्रहः-** विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्योऽधर्मः।

आत्ममात्रविशेषगुणाः के ?

**तर्कसंग्रहः- बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य, अनित्या जीवस्य।**

**दीपिका -** सुखं लक्षयति - सुख्यहम् इत्याद्यनुव्यवसायगम्यं सुखत्वादिकमेव लक्षणम्। यथाश्रुतं तु स्वरूपकथनमिति द्रष्टव्यम्।

**संस्कारः कतिविधिः, तद्भेदाश्च किंस्वरूपाः ?**

**तर्कसंग्रहः - संस्कारास्त्रिविधः - वेगो, भावना, स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टय मनोमात्रवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनः तदवस्थाऽऽपादकः स्थितिस्थापकः। कटादिपृथिवीमात्रवृत्तिः ।**

**दीपिका -** संस्कारं विभजते- संस्कार इति। संस्कारत्वजातिमान् संस्कारः।

वेगस्याश्रयमाह- वेग इति। वेगत्वजातिमान् वेगः।

भावनां लक्षयति- अनुभवेति। अनुभवध्वंसे अतिव्याप्तिवारणाय स्मृतिरिति। आत्मादौ अतिव्याप्तिवारणाय अनुभवेति। स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम्।

स्थितिस्थापकत्वं लक्षयति अन्यथेति। संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः। अन्ये रूपादयो विशेषगुणाः। द्रव्यविभाजकोपाधिद्वयसमानाधिकरण-वृत्तिजातिमत्वं विशेषगुणत्वम्।

## पुनरावृत्तिः (Recap)

- अयथार्थानुभवस्त्रिविधः- संशय-विपर्यय-तर्कभेदात् ।
- एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा- स्थाणुर्वा पुरुषो वेति।
- मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ 'रजतम्' इति ।
- व्याप्याऽऽरोपेण व्यापकारोपस्तर्कः। यथा- यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।
- स्मृतिरपि द्विविधा- यथार्था अयथार्थ चेति। प्रमाजन्या यथार्थाः। अप्रमाजन्या अयथार्था।
- सर्वेषामनुकूल- (तया)- वेदनीयं सुखम् ।
- प्रतिकूल (तया) वेदनीयं दुःखम् ।
- विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः।
- बुद्ध्यदयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या- ईश्वरस्य, अनित्याः जीवस्य ।
- संस्कारस्त्रिविधः- वेगो, भावना, स्थितिस्थापकश्चेति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अयथार्थानुभवस्य कति भेदाः?
2. विपर्ययः कः ?

3. स्मृतिः कतिविधा ? के च ते ?
4. प्रमाजन्या ----- स्मृतिः। (रिक्तं पूरयत)
5. प्रतिकूलतया वेदनीयं ------लक्षणम्। (रिक्तं पूरयत)
6. विहितकर्मजन्यो ------। (रिक्तं पूरयत)
7. संस्कारः कतिविधिः?
8. -------पृथिव्यादि चतुष्टयमनोमात्रवृत्तिः। (रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. संशयस्य किं लक्षणम् ?
2. तर्कस्य किं स्वरूपम् ?
3. स्मृतेः लक्षणं सोदाहरणं लिखत।
4. सुखस्य किं लक्षणम् ?
5. इच्छाद्वेषप्रयत्नानां कानि लक्षणानि ?

## एकैकया खण्डिकया उत्तराणि लिखत ।

**(Answer the following questions in a paragraph)**

1. आत्ममात्रविशेषगुणाः के ?
2. संस्कारः कतिविधिः, तद्भेदान् किंस्वरूपान् च लिखत?

## निर्दिष्टाभ्यासाः(Assignments)

1. अयथार्थानुभवः कति विधाः? विशदयत।
2. संस्कारः कः ? विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. त्रिविधः।
2. मिथ्याज्ञानं विपर्ययः ।
3. द्विविधा।
4. यथार्था।
5. दुःखम्।
6. धर्मः।
7. त्रिविधः।
8. वेगः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर, आर्. एस्. वाध्यार् आन्द सन्स, पालक्काट, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4

# Unit -4
# कर्म-सामान्य-विशेष-समवाय-अभावाः

## उद्देश्यानि (Learning Outcomes)

- न्यायवैशेषिकदर्शने परिचयः।
- न्यायदर्शनग्रन्थशैलीं परिचाययति।
- तर्कसंग्रहग्रन्थस्य परिचयः।
- न्यायशास्त्रपदार्थानां समग्रज्ञानम्।
- अभावस्वरूपं जानाति।

## प्राग्व्यपेक्षा (Prerequisites )

नाम्ना पदार्थसङ्कीर्तनम् उद्देशः। द्रव्यगुणकर्मसामान्य विशेषादि सप्तपदार्थानां नामानि। प्रतिपदार्थं विभागः। द्रव्याणि नव चतुर्विंशतिगुणाः। एतेषां विषयाणां सामान्यज्ञानं सिद्ध्यति। नित्यमेकमलोकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्तिः। पुनः अभावान् विशदयति।

## मुख्यविचाराः (Key words)

सामान्यं, विशेषः, समवायः, अभावः,अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जाति-व्यक्ती, विशेषनित्यद्रव्यं, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः।

## Discussions

**कर्मसामान्यविशेषसमवायाभावाः।**

**तर्कसंग्रहः - चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसन्निकृष्टयोगहेतुराकुञ्चनम्। शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।**

**दीपिका-** कर्मणो लक्षणमाह चलनेति। उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति। शरीरेति सन्निकृष्टसंयोगहेतुः कर्म आकुञ्चनम्। ऋजुतासम्पादकं प्रसारणमित्यर्थः।

तर्कसंग्रहः - **नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। परं सत्ता। अपरं द्रव्यत्वादि।**

**दीपिका-** सामान्यं लक्षयति नित्यमिति। संयोगेऽतिव्याप्तिवारणाय नित्यमिति। परमाणुपरिमाणादौ अतिव्याप्तिवारणाय अनेकेति। अनुगतत्वं समवेतत्वम्। घटाद्यत्यन्ताभावो घटाद्यनुगतोऽप्यसमवेतनाभावादौ अतिव्याप्तिः।

तर्कसंग्रहः - **नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।**

**दीपिका-** विशेषं लक्षयति- नित्येति।

तर्कसंग्रहः- **नित्यसम्बन्धः समवायः। अयुतसिद्धिवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ। अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।**

**दीपिका-** समवायं लक्षयति- नित्येति। संयोगेऽतिव्याप्तिवारणाय नित्येति। आकाशादौ अतिव्याप्तिवारणाय सम्बन्ध इति। अयुतसिद्धलक्षणमाह- ययोरिति। नीलो घट इति विशिष्टप्रतीतिः विशेषणविशेष्यसम्बन्धविषया विशिष्टप्रत्ययत्वात् दण्डीतिप्रत्ययवदिति समवायसिद्धिः। अवयवावयविनाविति। द्रव्यसमवायिकारणमवयवः। तज्जन्यं द्रव्यमवयवि।

**तर्कसंग्रहः-** अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्व कार्यस्य। सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य। **त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः।** यथा- भूतले घटो नास्तीति। **तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः।** यथा- घटो न पट इति।

**दीपिका -** प्रगभावं लक्षयति अनादिरिति। आकाशादौ अतिव्याप्तिवारणाय सान्त इति। घटादौ अतिव्याप्तिवारणाय अनादिरिति। प्रतियोगिसमवायकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः प्रागभावः। ध्वंसं लक्षयति- सदिरिति। घटादौ अतिव्याप्तिवारणाय अनन्त इति। आकाशादौ अतिव्याप्तिवारणाय सादिरिति। प्रतियोगिजन्यः प्रतियोगिसमवायि कारणवृत्तिः ध्वस्तव्यवहारहेतुः ध्वंसः।

अत्यन्ताभावं लक्षयति- त्रैकालिक इति।

अन्योन्याभावे अतिव्याप्तिवारणाय संसर्गावच्छिन्नेति। ध्वंसप्रागभावयोः अतिव्याप्तिवारणाय त्रैकालिक इति ।

अन्योन्याभावं लक्षयति - तादात्म्येति। प्रतियोगितावच्छेदकारोप्यसंसर्गभेदात् एकप्रति- योगिकयोरत्यन्ताभावान्योन्याभावयोर्बहुत्वम्। केवलदेवदत्ताभावात् दण्ड्यभावः इति प्रतीत्या विशिष्टाभावः, एकसत्वेऽपि द्वौ न स्तः इति प्रतीत्या द्वित्वावच्छिन्नाभावः संयोगसम्बन्धेन च घटवति समवायसम्बन्धेन घटाभावः। तत्तद्घटाभावात् घटत्वावच्छिन्ना- प्रतियोगिताकसामान्याभावश्चातिरिक्तः। एवमन्योन्याभावोऽपि। घटत्वेन पटो नास्तीति व्यतिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते। पटे घटत्वं नास्तीति तस्यार्थः। अतिरिक्तत्वे स केवलान्वयी। सामायिकाभावोऽप्यत्यन्ताभाव एव समयविषये प्रतीयमानः घटाभाववति घटानयने अत्यन्ताभावस्य अन्यत्र गमनाभावेऽपि अप्रतीतेर्घटापसरणे सति प्रतीतेर्भूतल- घटसंयोग प्रागभावध्वंसयोः घटात्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोग प्रागभावध्वंसयोरसत्वात्यन्ताभावस्याप्रतीतिः। घटापसरणं च संयोगध्वंससत्वात् प्रतीतिः इति। केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावा न पदार्थान्तरमिति गुरवः । तन्न। अभावानङ्गीकारे कैवल्यस्य निर्मुक्तमशक्यत्वात्। अभावाभावो भाव एव। नातिरिक्तः। अनवस्थाप्रसङ्गात्। ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येवेति प्राञ्चः। अभावाभावः अतिरिक्त एव । तृतीयाभावस्य प्रथमाभावरूपत्वात् नानवस्थेति नवीनाः।

**तर्कसंग्रहः- सर्वेषमपि पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम्।**

**दीपिका-** ननु प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त- अवयव- तर्क-निर्णय-वाद-जल्प- वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमाः। इति न्यायशास्त्रे षोडश पदार्थानामुक्तत्वात् कथं सप्तैवेत्यत आह सर्वेषामिति। सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थः। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गस्तु प्रमेयम् इति द्वादशविधं प्रमेयम्। प्रवृत्तिधर्मधर्मौ। रागद्वेषमोहदोषाः। रागः इच्छा। द्वेषो मन्युः। मोहः शरीरादौ

आत्मत्वभ्रमः। प्रेत्यभावो मरणम्। फलं भोगः। अपवर्गो मोक्षः। स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः। प्रयोजनं सुखप्राप्तिः दुःखहानिश्च। दृष्टान्तो महानसादिः। प्रामाणिकत्वेन अभ्युपगतोऽर्थः सिद्धान्तः। निर्णयो निश्चयः। स च प्रमाणफलम्। तत्वबुभुत्सोः कथा वादः। उभयसाधनवती विजिगीषुकथाजल्पः। स्वपक्षस्थापनहीना वितण्डा। कथा नाम नानावक्तृकः पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः। अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणं छलम्। असदुत्तरं जातिः। साधर्म्य-वैधर्म्य-उत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तासंशयप्रकरणहेत्वर्थापत्य-विशेषोपपत्युपलब्धिनित्यानित्यकार्याकार्यसमा जातयः। वादिनोऽपजयहेतुर्निग्रहस्थानम्। प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिज्ञाविरोधः, प्रतिज्ञासन्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्यकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणम्, निरनुयोज्या-नुयोगः, द्वान्तः, हेत्वाभासश्च निग्रहस्थानानि। शेषं सुगमम् ।

ननु करतलानलसंयोगे सत्यपि प्रतिबन्धके सति दाहानुपपत्तेः शक्तिः पदार्थान्तरमिति चेत्, न। प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात्। ननु भस्मादिना कांस्यादौ शुद्धिदर्शनात् आधेयशक्तिरङ्गीकार्येति चेत् न। भस्मादिसंयोगसमानकालीनाऽस्पृश्यस्पर्शप्रतियोगिकयावदभावसहितभस्मादि संयोगध्वंसस्य शुद्धिपदार्थत्वात् ।

स्वत्वमपि न पदार्थान्तरम्। यथेष्टविनियोगयोग्यत्वस्य स्वत्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति।

अथ विधिनिरूप्यते- प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः। तत्प्रतिपादको लिङ्गादिर्वा। कृत्यसाध्ये प्रवृत्यदर्शनात्, कृतिसाध्ये प्रवृत्तिदर्शनात्। कृतिसाध्यताज्ञानं प्रवर्तकम्। न च विषभक्षणा प्रवृत्तिप्रसङ्गः, इष्टसाधनतालिङ्गककृतिसाध्यताज्ञानस्य

काम्यस्थले विहितकालशुचिजावित्वनिमित्तज्ञानजन्यस्य नित्यनैनिमित्तिकस्थले प्रवर्तकत्वात्। न चाननुगमः। स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वस्यानुगतत्वादिति गुरवः। तन्न, लाघवेन कृतिसाध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात्। न च नित्ये नैमित्तिकस्थले इष्टसाधनत्वाभावाद् प्रवृत्तिप्रसङ्गः। तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात् । तस्मात्कृतिसाध्येष्टसाधनत्वमेष लिङ्गाद्यर्थः। ननु ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यत्र लिङ्गस्वर्गसाधनकार्यं प्रतीयते यागस्याशुतरविनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोगात्। तद्योगं स्थायिकार्यमपूर्वमेव लिङ्गद्यर्थः। कार्यं कृतिसाध्यम्। कृतेः सविषयत्वाद्विषयाकांक्षायां यागो विषयत्वेनान्वेति, कस्य कार्यम् इति नियोज्यकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति। कार्यबोद्धा नियोज्यः। तेन ज्योतिष्टोम नामकं यागविषयं स्वर्गकामस्य कार्यम् इति वाक्यार्थः सम्पद्यते। वैदिकलिङ्गत्वात् यावज्जीवमग्निहोत्रं जुहुयात् इति नित्यत्वाक्योऽप्यपूर्वमेव वाच्यं कल्प्यते। आरोग्यकामो भेषजपानं कुर्यात् इत्यादि लौकिकलिङ्गः क्रियाकार्ये लक्षणा इति चेत्, न। यागस्याप्ययोग्यतानिश्चयाभावेन साधनतया प्रतीत्यनन्तरं निर्वाहार्थं अवान्तरव्यापारतयाऽ-पूर्वकल्पनात्। कीर्तनादिना नाशश्रुतेर्न यागध्वंसो व्यापारः। लोकव्युत्पत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङ्बोध्यत इति लिङ्गत्वेन विध्यर्थकत्वम्। आख्यातत्वेन यत्नार्थकत्वम्। पचति पाकं करोतीति विवरणदर्शनात्, कि करोतीति प्रश्ने पचतीत्युत्तराच्च आख्यातस्य प्रयत्नार्थकत्वनिश्चयात्।

रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा, देवदत्तः पचति, देवदत्तेन पच्यते तण्डुलः इत्यादौ कर्तृकर्मणोर्नाख्यातार्थत्वम्। किं तु तद्गतैकत्यादीनामेव। तयोराक्षेपादेव लाभः।

प्रयजतीत्यादौ धातोरेय प्रकर्षे शतिः। उपसर्गाणां तत्वमेव तु तव शक्तिरस्ति।

पदार्थज्ञानस्य परमप्रयोजनं मोक्षः। तथाहि- आत्मा वाऽरे दृष्टव्यः श्रौतव्यो मन्तव्यो निदिध्यासितव्यः इति श्रुत्या श्रवणादीनां तत्त्वसाक्षात्कारे हेतुत्वबोधनात्। श्रुत्या

देहादिविलक्षणात्मज्ञाने सत्याप्यसम्भावनानिवृत्तेः युक्त्यनुसन्धानरूपमननसाध्यत्वात्। मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगित्वम्। तदनन्तरं श्रुत्योपदिष्ट यागविधिना निदिध्यासने कृते तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहम-भिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्यभावे धर्माधर्मयोरभावात् जन्मभाव पूर्वधर्माधर्मयोः अनुभवेन निवृत्तेः ज्ञानमात्रसाध्यत्वात्। तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति साधनान्तरानिषेधाच्च। ननु तत्प्राप्तिहेतुविज्ञानं कर्म चोक्ता महामुने इति कर्मणोऽपि मोक्षसाधनत्वाश्रवणात् ज्ञानकर्मणोः समुच्चय इति चेत्, न। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्। ज्ञानं च विमलीकुर्वन् अभ्यासेन च पाचयेत्। अभ्यासात्पक्वविज्ञान-कैवल्यं लभते नरः इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात्, ज्ञानद्वारैव कर्म मोक्षसाधनम्, न साक्षात् तस्मात् पदार्थज्ञानस्य मोक्षः परमप्रयोजनम् इत्येव रमणीयमिति।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।<br>
अन्नंम्भट्टेन विदुषा रचितस्तर्कसंग्रहः।। इति<br>
श्रीमदन्नंपट्टविरचिता तर्कदीपिका समाप्ता।

## पुनरावृत्तिः (Recap)

- नित्यमेकमनेकाऽनुगतं सामान्यम् । द्रव्यगुणकर्मवृत्तिः ।
- सामान्यं द्विविधं पराऽपरभेदात्
- नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।
- नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः।
- अनादिः सान्तः प्रागभावः ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. सामान्यं कति विधम् ?
2. चलनात्मकं ---------।(रिक्तं पूरयत)
3. ऊर्ध्वदेशसंयोगहेतुः----------।(रिक्तं पूरयत)
4. अधोदेशसंयोगहेतुः------।(रिक्तं पूरयत)
5. शरीरसन्निकृष्टसंयोगहेतुः------।(रिक्तं पूरयत)
6. शरीरविप्रकृष्टसंयोगहेतुः-------।(रिक्तं पूरयत)
7. विशेषणस्य किं लक्षणम् ?
8. समवायः नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. सामान्यस्य किं लक्षणम् ?
2. किं नाम कर्म ?
3. प्रागभावस्य लक्षणं किम्?
4. अत्यन्ताभावस्य लक्षणम् किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. समवायस्य किं लक्षणम् ?
2. अभावः विशदयत।
3. अन्योन्याभावस्य लक्षणं किम्?

SGOU

4. सामान्यस्य लक्षणं लिखत।

## निर्दिष्टाभ्यासाः (Assignments)

1. समवायस्य लक्षणं विशदयत।
2. अभावः सभेदान् विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. परमपरं चेति द्विधम्।
2. कर्म।
3. उत्क्षेपणम्।
4. अपक्षेपणम् ।
5. आकुञ्चनम्।
6. प्रसारणम्।
7. नित्यद्रव्यवृत्तयः व्यावर्तकाः विशेषाः ।
8. नित्यसम्बन्धः समवायः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६
2. टि.के. रामचन्द्र अय्यर्, ए षोर्ट् हिस्टरि ओफ् सान्स्क्रीट् लिटरेच्चर्, आर्. एस्. वाध्यार् आन्द् सन्स्, पालक्काट्, २०१८
3. अन्नम्भट्टः, तर्कसंग्रहः, भूमिका ।

## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Tarkasangraha (whole) with Dipika (upto Pratyaksha) in Sanskrit
2. Tarkasangraha of Annambhatta, Dr. V.N.Jha, Chinmaya International Foundation Sodha Samsthan, Ernakulam.
3. Tarkasangraha with Dipika and notes (in Eng), Sri Ramakrishna Mutt, Chennai- 4
4. Tarka Sangraha, A primer of Indian Logic, Kuppuswamy Sastri, Kuppuswamy Sastri Research Institute, Chennai, 1951.
5. Tarkasangraha Dipika (Malayalam), Dr T Aryadevi, Kerala sahitya Academy, Thrissur.


SGOU

Set-1

Model question paper

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……… Reg. No : ………...............

Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**

**DISCIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN01DE - तर्कशास्त्रपरिचयः**

(CBCS - UG)

2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

---

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।**

**SECTION – A**

**(प्रथमो भागः)**

I. **एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten questions in a word or sentence)**

1. कस्मात् धातोः दर्शनशब्दः निष्पन्नः?
2. नव्यन्यायदर्शनस्य प्रकरणग्रन्थौ कौ?
3. गौतममहर्षेः अपरनामं किम्?
4. अभावः कति विधः ? कानि च तानि?
5. द्रव्यसामान्यलक्षणं किम् ?
6. रूपरहितत्वे सति स्पर्शवत्वं............लक्षणम् । (रिक्तं पूरयत)
7. सः द्विविधः सुरभिः असुरभिः च। सः कः?
8. घटरूपगुणप्रत्यक्षे कः सन्निकर्षः ?
9. सर्वव्यवहारहेतुत्वे सति गुणत्वं ..............लक्षणम्। (रिक्तं पूरयत)
10. पञ्चावयवाः के?
11. किं नाम व्याप्तिः?
12. असिद्धाः कति ? के ते ?
13. विशेषणस्य किं लक्षणम् ?
14. लक्षणा कति विधाः? काः च ताः?

SGOU

15. संस्कारः कतिविधः?

## SECTTION – B

(द्वितीयो भागः)

II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)

**(Answer any five questions in one or two sentences)**

16. सांख्यदर्शने कति तत्वानि सन्ति? कानि च तानि?

17. योगसूत्रे प्रतिपादितं नियमाः के?

18. मङ्गलस्य किं प्रयेजनम्

19. तर्कसंग्रहे कति गुणाः ? कानि च तानि?

20. परिमाणस्य किं लक्षणं, तस्य भेदाः के ?

21. साङ्ख्यायाः लक्षणं किं, स कुत्र वर्तते?

22. सन्निकर्षः कतिविधः? ते च के ?

23. हेत्वाभासाः के?

24. बाधितस्य लक्षणं किम् ?

25. शब्दप्रमाणस्य किं स्वरूपम् ?

## SECTION –C

(तृतीयो भागः)

III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। (6x5=30)

**(Answer any six questions)**

26. वेदान्तदर्शनं अधिकृत्य लिखत।

27. बौद्धदर्शनं अधिकृत्य लिखत।

28. नव्यन्यायदर्शनस्य उत्पत्तिः विकासश्च प्रतिपादयत।

29. मङ्गलाचरणस्य आवश्यकतां समर्थयत।

30. सृष्टिप्रलयस्वरूपं निरूपयत।

31. प्रत्यक्षप्रमाणं सभेदान् च विशदयत।

32. कारणत्रैविद्ध्यं विशदयत।

33. लिङ्गं सोदाहरणं प्रतिपादयत।

34. असिद्धं प्रतिपादयत।

35. अनुमानस्य भेदं लिखत।

36. अभावः सभेदान् विशदयत।

37. वाक्यार्थज्ञाने के हेतवः ? विशदयत।

**SECTION –D**

**(चतुर्थो भागः)**

IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। **(2x10=20)**

**(Write an essay on any two of the following)**

38. तर्कसंग्रहरीत्या शब्दप्रमाणं विशदयत।

39. सन्निकर्षः कति विधाः? व्याख्यात।

40. रूपादिचतुष्टयस्य सविशेषतां प्रतिपादयत।

41. तर्कसंग्रहे प्रतिपादितं द्रव्याणि विशदयत ।

Set-2

Model question paper

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……… Reg. No : ………...............

Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**

**DISCIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN01DE- तर्कशास्त्रपरिचयः**

**(CBCS - UG)**

**2022-23 - Admission Onwards**

**Time: Hours** **Max Marks: 70**

---

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।**

**SECTION – A**

**(प्रथमो भागः)**

I. **एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten questions in a word or sentence)**

1. आस्तिकदर्शनं कति विधम्? कानि च तानि?
2. दोषत्रयाणि कानि?
3. कति कर्माणि ? कानि च तानि?
4. किं नाम उद्देशः?
5. द्रव्याणि कति? कानि च तानि?
6. अतीतादिव्यवहारहेतुः .........। (रिक्तं पूरयत)
7. आत्मनः लक्षणं किम्?
8. उष्णत्वे सति स्पर्शवत्वं ............ लक्षणम्। (रिक्तं पूरयत)
9. पीलुपाकवादिनः के?
10. त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणवत्वं कस्य लक्षणम्?
11. स्नेहस्य लक्षणम् किम्?
12. यथार्थानुभवभेदाः के ?
13. रूपत्वप्रत्यक्षे कः सन्निकर्षः ?
14. पञ्चमीविभक्त्यन्तं लिङ्गप्रतिपादकं वाक्यं............ । (रिक्तं पूरयत)

15. वाक्यं कतिविधम् ? के च ते ?

**SECTTION – B**

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**

**(Answer any five questions in one or two sentences)**

16. आस्तिकदर्शनानि कति? कानि च तानि?

17. तर्कशास्त्रपदस्य उत्पत्तिः कः?

18. तर्कसंग्रहे कति गुणाः ?कानि च तानि?

19. द्रव्याणि कति? कानि च तानि?

20. तर्कसंग्रहे कति पदार्थाः? कानि च तानि?

21. पृथक्त्वस्य किं लक्षणम् ?

22. रसस्य लक्षणं किम् ?

23. यथार्थानुभवस्य किं लक्षणम् ?

24. विरुद्धस्य लक्षणं किम् ?

25. अन्योन्याभावस्य लक्षणं किम्?

**SECTION - C**

**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत । (6x5=30)**

**(Answer any six questions)**

16. साङ्ख्यदर्शनं अधिकृत्य लिखत।

17. चार्वाकदर्शनं अधिकृत्य लिखत।

18. मङ्गलाचरणस्य आवश्यकतां समर्थयत।

19. तर्कसंग्रहे पदार्थाः विशदयत ।

20. पृथिव्याः लक्षणं विशदयत।

21. सुवर्णस्य पार्थिवत्वम् आशङ्क्य तैजसत्वं समर्थयत।

22. अन्यथासिद्धिः कतिविधा ? विशदयत।

23. सविकल्पक - निर्विकल्पक - ज्ञानस्वरूपं किम् ? विशदयत।

**24.** व्याप्यत्वासिद्धः कः, किं च उपाधिस्वरूपम्?

**25.** परामर्शस्य स्वरूपं विशदयत।

**26.** संस्कारः कतिविधिः, तद्भेदान् किंस्वरूपान् च लिखत।

**27.** अयथार्थानुभवः कति विधाः? विशदयत।

**SECTION –D**

**(चतुर्थो भागः)**

IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। **(2x10=20)**

**(Write an essay on any two of the following)**

**26.** अभावः सभेदान् विशदयत।

**27.** अनुमानप्रमाणं विशदयत।

**28.** कार्यकारणविचारः निरूपयत।

**29.** नास्तिकदर्शनानि व्याख्यायत।

SGOU

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

तर्कशास्त्रपरिचयः

COURSE CODE: B21SN06DE

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-982562-8-7